**आरण्यकम्** मार्च 2002
अर्धवार्षिकं संस्कृतशोधपत्रम् आर० एन० आई० सं० 58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्


1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   – स्व० पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक' स्य भोजपुरी-पद्यानुवादः)
   – श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   – श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' – पं०जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) – स्व० भवानीदत्त पाण्डेयः
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधरणा – श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् – पं० व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   – श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह – श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) – स्व० पं० उपेन्द्रनारायणदत्त शर्मा
   41 रूप्यकाणि
11. भावनाविलासशतकम् – स्व० पण्डित उपेन्द्रनारायणदत्त शर्मा
   21 रूप्यकाणि
12. महाभारतसारसंग्रहः (प्रकाश्यः) – स्व० पण्डित वचन मिश्रः


# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

संस्कृतप्रसारपरिषद्
आरा (विहारः)

संस्कृतप्रसारपरिषद्, आरा (विहारः)
सरस्वती नः सुभगा मयस्करत्

मार्च 2002

# ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते । वर्षारम्भः चैत्रात् (मार्च तः) मन्यते ।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते । मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते । तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्कः उपलब्धौ सत्यां प्रेषयिष्यते ।
3. वार्षिकं शुल्कं त्रिंशत् (३०) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चदश रूप्यकाणि वर्तते । शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम् ।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिकनिबन्धाः प्रकाशनाय गृह्यन्ते ।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते ।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किताः वा स्युः । रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम् ।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम् ।
8. अस्वीकृता लेखा निर्धारित ‘स्टाम्प’-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः ।
9. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते ।
10. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः ।
11. पत्रसम्बद्धः सर्वविधपत्रव्यवहारः धनादेशद्वारा शुल्कप्रेषणञ्च **डा० गोपबन्धु मिश्रः, सम्पादकः, आरण्यकम्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (विहारः)-802301** इति सङ्केतेन विधेयम् ।

# आरण्यकम्

## संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षम् – नवमम् अङ्कः – प्रथमः

चैत्रः, वि० सं० २०५९

मार्च, २००२

प्रतिवर्षं प्रकाशनकालः
चैत्रः, आश्विनः-विक्रमाब्दः
मार्च, सितम्बर

प्रत्यङ्कम् - १५ रूप्यकाणि वार्षिकं शुल्कं ३० रूप्यकाणि

## परामर्शदात्री समितिः

पण्डित वासुदेव द्विवेदी, वाराणसी
डॉ० सुरेशचन्द्र गो० काण्टावाला, बड़ोदरा
डॉ० हरिहर झा, दरभङ्गा
डॉ० उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ० भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ० राय अश्विनी कुमारः, बोधगया

*संस्थापकः*

स्व० पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

*सम्पादकः*

डॉ० गोपबन्धु मिश्रः

*प्रकाशिका*

संस्कृतप्रसारपरिषद्
मारुतिमन्दिरम्
प्रकाशपुरी, आरा (विहारः) 802301
दूरभाषा - (06182) 24193

संस्कृतप्रसारपरिषद्, आरा पक्षतः डॉ० गोपबन्धु मिश्रेण, आरा प्रिन्टर्स, गोला मुहल्ला, आरा, बिहार-802301 इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च ।

डॉ० गोपबन्धु मिश्रः
सम्पादकः



'आक्रान्तः'

# सम्पादकीयम्

करालोऽयं कालः । "कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्त" इति श्रीभगवान् गीतायाम् अवोचत् । अस्माकं हीनभाग्यतया आरण्यकस्य पुरोहितः प्रधानसम्पादकमहोदयः पण्डित व्रजभूषण मिश्र 'आक्रान्तः' ३० मार्च २००२ दिनाङ्के सायं सप्तवादने कालेनानेन समाहृत ऐहिकं लोकं परित्यज्य स्वर्लोकमाप्तवान् इति कष्टेन विवशतया च सूच्यते । कवित्वभावेन नितराम् आक्रान्तः 'आक्रान्त' इति नाम्ना अस्मिन्नखिले भोजपुरमण्डले (पुरातने शाहाबादाख्ये मण्डले च) प्रथितपशाः संस्कृतवाग्विभूषणः पण्डित व्रजभूषण मिश्रः काव्यशास्त्रविनोदेनैव सम्पूर्णं जीवनं यायपन् आसीत् । भोजपुरमण्डलस्य आरानगरात् अनतिदूरे विद्यमाने पवनाख्ये ग्रामे १९२६ ईस्वीये वर्षे लब्धजन्मा अयं बाल्यकालादेव संस्कृतभाषासाहित्याध्ययने निरतः आसीत् । आर्थिकदुरवस्थाकारणेन अल्प एव वयसि माध्यमिके ततः परम् उच्चे विद्यालये संस्कृतं पाठयन् अपि श्रीमान् आक्रान्तमहोदयः शास्त्राध्ययने काव्यरचनायां च सततं संलग्न आसीत् । अस्य महोदयस्य त्रिषु भागेषु प्रकाशितं 'मारुति संस्कृत अनुवाद सुधे'ति पुस्तकं छात्रेष्वध्यापकेषु चातीव प्राप्तप्रसिद्धि अस्ति । 'मातृस्तोत्रम्', 'संस्कृतनिबन्धसञ्चयनम्' इति ग्रन्थद्वयस्य रचयिताऽसौ 'सुदामचरितम्' 'उपेन्द्रविङ्.नदर्शनम्' इति ग्रन्थद्वयस्य सम्पादनमपि कृतवान् । जीवनस्य अन्तिमवर्षत्रये लिखितेसु गद्यकृतिषु 'हनुमच्चरितं' सद्यः

प्राकाश्यमागमिष्यति। आरण्यकस्यास्मिन्नङ्के तस्य 'ध्रुवचरितं' प्रकाश्यते। आगामिषु अङ्केषु 'श्रवणकुमारचरितं', 'प्रह्लादचरितम्' 'आत्मचरितं' 'चिन्तन..ने' च प्रकाशयिष्यन्ते।

आरानगरस्य संस्कृतसेविनां प्रतिनिधिपरिषद्रूपेण १९८७ तमे वर्षे 'संस्कृतप्रसारपरिषद्' इति स्वयंसेविनी संस्था संस्थापिता। १९८८ तमे वर्षे 'आरण्यकम्' इदं प्रारब्धम्। मूलतः एव माननीयः आक्रान्तमहोदयः परिषदः अध्यक्षः आरण्यकस्य प्रधानसम्पादकश्च आसीत्। अतीव सरलं जीवनं यापयता आक्रान्तमहोदयेन महता श्रमेण यत् धनम् अर्जितं, तस्य महदंशं प्रदाय परिषदः बहुविधं कार्यं नित्यं संपोषितम् आरण्यकस्यापि मूलतः प्रकाशनव्ययादिभारः निरूढः। संस्कृताय नैजं सर्वं किमपि समर्पयितुकामेन तेन आरायाम् अद्वितीयं "मारुतिसंस्कृतशोधसंस्थानं" विनिर्मितम्। तस्यैव प्रेरणया पोषकत्वेन च परिषदा अनेकानि अप्रकाशितपुस्तकानि संपाद्य प्रकाशितानि, आरण्यकमुखेन संस्कृतसौरभसंचयनम् इति ग्रन्थमालाक्रमेण तेषां पुस्तकानां क्रमशः प्रकाशनं जातं जायमानं चास्ति। किमधिकं ब्रूमः परिषदः कार्यालयः 'मारुतिमन्दिरम्' इत्याख्ये तस्य आवासपरिसरे स्वतन्त्रतया विनिर्मिते मारुतिसंस्कृतशोधसंस्थाने एव विद्यमानोऽस्ति। संस्कृतप्रसारपरिषदः यत् किमपि वृत्तमस्ति, आरण्यकस्यास्य या काऽपि उपलब्धिरस्ति तत् सर्वं माननीय'आक्रान्त' महोदयस्य कारणेनैव इत्यतः अद्य तेन विहीनेयं परिषत् चन्द्रविहीन आकाश इव संस्मरणीयशोभा जायमानाऽस्ति। आरण्यकं चेदम् अकस्माद् अवलम्बनहीनं सत् मध्येसमुद्रं नाविकरहिता नौका इव संकटापन्नं संजातमस्ति।

एवंभूतायां किंकर्तव्यविमूढतायां कः पन्थाः अस्माकम् ? एतस्य यक्षप्रश्नस्य उत्तरमपि पण्डितव्रजभूषणमिश्रमहोदयस्यैव साधनापूर्णं जीवनं, तपस्त्यागसंपूतं जीवनदर्शनं, निरन्तरध्येयवादः च प्र..तुं क्षमाः सन्ति। अरण्ये ऐकान्तिकतया निरवधि तपश्चरणमिव 'आरण्यकम्' इदं प्रथमकालादेव आक्रान्तमहोदयेनादृतं 'चरैवेति' इति वैदिकम् आरण्यकं वा वाक्यमनुसृत्य प्रचलदस्ति। अद्यापि सूक्ष्मशरीरगतस्य तस्य सूक्ष्मं दृढं च तदेव प्रेरणावाक्यम् अस्माकं पाथेयमस्ति। पण्डित व्रजभूषणमिश्र 'आक्रान्त' महोदयस्य आत्मनः परमधाम्नि परमशान्तये परमेश्वरं भूयः प्रार्थयामाहे। आक्रान्तमहोदयेन हीनः शोकाकुलः अखिलः संस्कृतप्रसारपरिषत्परिवारः तं प्रति स्वाधमर्णतां विज्ञाप्य भूयः भूयः श्रद्धासुमनोभिः तं दिव्यात्मानं तोषयितुं वाञ्छति। गोलोकवासी पण्डित व्रजभूषणमिश्र आक्रान्तमहोदयः इदानीं स्थूलशरीरेण अविद्यमानोऽपि अस्मासु संस्कृतकार्येषु च सुतरां सूक्ष्मशरीरेण जीवति जीविष्यति चेति विश्वस्य पुनः तस्य आत्मानं प्रति श्रद्धाञ्जलिं विनिवेद्य विरम्यते।

हे आक्रान्त ! विशुद्धात्मन् ! संस्कृतवाग्विभूषण !
लभतां परमां शान्तिं मारुतेरनुकम्पया ।।

मार्च २००२

गोपबन्धु मिश्रः
सम्पादकः

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
| --- | --- | --- |
| १. समासशक्तिसिद्धान्तस्य ऐतिहासिकः क्रमविकासः | डॉ० वनमाली विश्वालः<br>उपाचार्यः, गङ्गनाथ झा केन्द्रीय संस्कृत विद्यापीठम्, आजाद पार्क इलाहाबाद - 211002 | १ |
| २. जगन्नाथाभिमता प्रतिभा | डॉ० अरुण कुमार मण्डलः<br>उपाचार्यः, संस्कृतविभागः<br>विश्वभारती, शान्तिनिकेतन (पश्चिम बंगाल) | १३ |
| ३. पञ्चवक्त्रस्य शिवस्य षोडशी | डॉ० श्री प्रकाश रायः<br>व्याख्याता, संस्कृतविभागः<br>श्रम भारती महाविद्यालयः<br>रामगढ़ (कैमूर), विहारः | १७ |
| ४. भवभूतिकृतमहावीरचरितस्य नाटकीयवैशिष्ट्यम् | शोभा कुमारी, शोधच्छात्रा<br>डॉ० श्यामानन्द झा<br>वीर कुँवर सिंह विश्वविद्यालयः<br>आरा | २१ |
| ५. विश्वविद्यालय अनुदान आयोग-(यू. जी. सी.) संचालिता जे. आर. एफ./नेट (संस्कृतम्) परीक्षा कथं लेखनीया ? | तरुणा सिंह<br>शोधच्छात्रा (संस्कृतम्)<br>वीर कुँवर सिंह विश्वविद्यालयः<br>आरा | २७ |
| परिशिष्टम्<br>संस्कृतसौरभसञ्चयनम्<br>(चतुर्थं पुष्पम्)<br>ध्रुवचरितम् | प्रणेता – पण्डित व्रजभूषण मिश्र 'आक्रान्तः'<br>सम्पादकः – डॉ० गोपबन्धु मिश्रः | |


# समासशक्ति-सिद्धान्तस्य ऐतिहासिकः क्रमविकासः


**डॉ० बनमाली बिश्वालः**


## प्रास्ताविकम्

अष्टाध्याय्यां पाणिनिना यद्यप्यनेकेषां पारिभाषिक-शब्दानां लक्षणानि कृतानि तथापि अनेके शब्दास्तत्र पारिभाषिकेऽर्थे प्रयुक्ताः सन्तोऽपि परिभाषिताः न वर्तन्ते । पूर्व-पाणिनीय-पारिभाषिकशब्दानां लक्षणानि पाणिनेः पूर्वजैः वैयाकरणैः स्व-स्वशास्त्रेषु प्रदत्ताः । अतस्तेषां पुनः परिभाषा-विधाने पाणिनिः शिथिलो दृश्यते । समासोऽपि कश्चित् पूर्व-पाणिनीयः पारिभाषिक-शब्दोऽस्ति । अतस्तस्य साक्षाल्लक्षणं पाणिनिना अष्टाध्याय्यां न विहितम् । परन्तु पाणिनीयसरणिमनुसृत्य तस्य किञ्चिल्लक्षणं कर्तुं शक्यते । अष्टाध्याय्याः द्वितीयेऽध्याये प्रथमे पादे, द्वितीये पादे च ये शब्दाः साधिताः अन्वाख्याताः वा ते समासपदवाच्याः भवन्तीति वक्तुं शक्यते । अथवा समासाधिकारपठितत्वं समासत्वमित्यपि लक्षणं वक्तुं शक्यते । अर्थात् "प्राक्कडारात् समास" इति सूत्रादारभ्य समासस्य महाधिकारे ये शब्दा अन्वाख्यातास्ते समासपदवाच्याः स्युरित्यपि लक्षणं भवितुमर्हति ।

समासानां विभजनमपि विभिन्नैः शास्त्रकारैः भिन्नया प्रणाल्या कृतम् । तेषु विभागेषु अव्ययीभाव-तत्पुरुष-द्वन्द्व-बहुव्रीह्यात्मकः चतुर्धा विभागः प्राचीनतमः प्रसिद्धतमश्चास्ति । एतेषां चतुर्विधानां समासानां स्वरूपलक्षणानि पतञ्जलिना कृतानि – पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वन्द्वः, अन्यपदार्थप्रधानो बहुव्रीहिश्च ।[1]

भट्टोजिदीक्षितेन वैयाकरण-सिद्धान्तकारिकायामेवं च कौण्डभट्टेन वैयाकरणभूषणे समासस्य पारम्परिकश्चतुर्धा विभागः समालोचितः ।[2] स्व-स्वग्रन्थेषु

ताभ्यां पतञ्जलेः स्वरूपलक्षणानि च प्रत्याख्यातानि। समासलक्षणप्रसङ्गे पूर्वपदार्थप्रधानादिषु लक्षणेषु अव्याप्त्यतिव्याप्त्यादिदोषान् प्रदर्श्य कौण्डभट्टः अव्ययीभावाधिकार-पठितत्वमव्ययीभावत्वं, तत्पुरुषाधिकारपठितत्वं तत्पुरुषत्वम् इत्येवंविधं लक्षणं परामृशति।[3]

समासस्य बाह्यस्वरूपमभिलक्ष्य भट्टोजिदीक्षितेन समासानां किञ्चिदन्यथा विभाजनं प्रस्तुतम्। एवमाचरिते समासाः षट्प्रकारकाः भवन्ति। तद्यथा-१. सुप्-सुप्, २. सुप्-तिङ्, ३. सुप्-नामन् (अत्र नामन् इति पदं प्रातिपदिकेऽर्थे प्रयुक्तम्), ४. सुब्-धातु, ५. तिङ्-तिङ् च। अधःप्रस्तुता कारिका अत्र प्रमाणरूपेण उल्लेखमर्हति –

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥[4]

एतेषां समासप्रकाराणाम् उदाहरणानि क्रमशः राजपुरुषः, अनुव्यचलद्, कुम्भकारः, कटप्रूः, पीबतखादता, जहिस्तम्बश्च।

विभक्तिलोपः यद्यपि समासस्य मुख्यं फलं तथापि तत्र एकपदत्व-एकोदात्तत्व-क्रमनियतत्वादीनि अन्यान्यपि फलानि भवन्ति। वाक्येषु, विग्रहवाक्येषु वा अवयवार्थमतिरिच्य कश्चिद् विशेषोऽर्थः प्रतीयते। स चार्थः विभक्तिप्रदत्तोऽर्थोऽस्ति। समासावस्थायां यदा विभक्तिलोपः भवति तदा स विशेषोऽर्थः कथं बुध्यते इति मनसि स्वतः जिज्ञासा उत्तिष्ठति। विभक्त्यर्थस्वीकारोऽपि समासे कर्तुं न शक्यते। यतो हि तेन विग्रह-समासयोरेकार्थत्वहानिः स्याद्। अतः समासस्थले अवयवार्थसम्वलितः कश्चिद् विशेषोऽर्थोऽवश्यं स्वीकर्तव्यः। स च समासनिष्ठोऽतिरिक्तोऽर्थः कथं बोद्धव्य इति प्रश्नोऽपि स्वाभाविकः। प्रश्नस्यास्य उत्तरमेकं न भवति। प्रसङ्गेऽस्मिन् शास्त्रकारेषु महान् विवादः दरीदृश्यते। मुख्यतया त्रयः सम्प्रदाया अत्र भिन्नमतं पोषयन्तः दृश्यन्ते। ते च सन्ति – नैयायिकाः, वैयाकरणाः, मीमांसकाश्च। विवादश्च वैयाकरण-नैयायिकयोर्मध्ये बलवत्तरः प्रतीयते। प्रसङ्गेऽस्मिन् मीमांसकाः बह्वंशेन नैयायिकैः सह सहमताः दृश्यन्ते। केचन मीमांसकाः प्रसङ्गेऽस्मिन् वैयाकरणानपि समर्थयन्ति।



समासार्थः शक्त्याऽवगम्यते इति वैयाकरणा आमनन्ति। किन्तु नैयायिकाः तथा मीमांसकेष्वेके लक्षणयैव समासार्थोऽवगम्यते इति सयुक्तिकमुपस्थापयन्ति।

वैयाकरणैः स्व-स्वग्रन्थेषु समासशक्तेः प्रतिनिधिभूता अनेके शब्दाः प्रयुक्ताः। यथा समूहशक्तिः, समुदायशक्तिः, अतिरिक्तशक्तिः, विशिष्टशक्तिः, क्लृप्तशक्तिः, एकशक्तिः तथा स्वतन्त्रशक्तिश्च। नैयायिकैः मीमांसकैरपि विभिन्न-समासेषु भिन्ना भिन्ना लक्षणाऽङ्गीकृता – पद-लक्षणा, वाक्य-लक्षणा, समुदाय-लक्षणा, समूह-लक्षणा, साहित्य-लक्षणा, विशिष्ट-लक्षणा, सम्बन्धलक्षणा, शक्यसम्बन्ध-लक्षणा, सामीप्य-लक्षणा, प्राशस्त्य-लक्षणा, जहत्स्वार्थ-लक्षणा, अजहत्स्वार्थ-लक्षणा, निरूढलक्षणा, लक्षितलक्षणा च। कस्मिन् समासे का लक्षणा तैः स्वीकृता इति विषये अनन्तरं चर्चां विधास्यामः।

आलेखेऽस्मिन् स्थूलरूपेण कोटिद्वयमुपस्थापयिष्यते। प्रथमकोटौ लक्षणावादिनां नैयायिक-मीमांसकानां मतानि उपस्थापयिष्यन्ते ये समासे शक्तिं नाङ्गीकुर्वन्ति। अनन्तरं समुदायशक्तिवादिनां वैयाकरणानां मतानि सिद्धान्तरूपेणोपस्थापयिष्यन्ते। प्रथमकोटौ यद्यपि मुख्यतया नैयायिक-मीमांसकानां समावेश इष्यते तथापि प्रसङ्गेऽस्मिन् नैयायिक-मार्गमनुसरतां केषांचन वैयाकरणानां कैयट-हरदत्तादीनामपि वर्गेऽस्मिन् परिगणनमुचितं प्रतिभाति। पक्षान्तरे समासे शक्तिमिच्छतां कुमारिलभट्टसदृशानां केषांचन मीमांसकानां वैयाकरणकोटौ अन्तर्भावः समीचीनः प्रतीयते। बहुव्रीहि-समासप्रसङ्गे एकस्मिन्नेव कोटौ स्थापितानां नैयायिक-मीमांसकानामपि परस्परं मतानैक्यं परिलक्ष्यते। नैयायिकाः बहुव्रीहौ पदलक्षणां स्वीकुर्वन्ति परन्तु मीमांसका अत्र वाक्यलक्षणामभिप्रयन्ति। नैयायिकेषु गङ्गेशः किञ्चिदन्यथा चिन्तयति, स सर्वत्र निरूढलक्षणां समर्थयति।

समासशक्तिमधिकृत्य शास्त्रेषु यावन्तो विवादाः सन्ति तदनुरुध्य विषयेऽस्मिन् शोधस्य कृते महानवकाशोऽस्ति। पूर्वोक्तेषु त्रिषु सम्प्रदायेषु विषयमेनमधिकृत्य कदा कानि परिवर्तनानि अभवन्, तथा सिद्धान्तेऽस्मिन् कस्य समये कस्मिंश्च ग्रन्थे कीदृशः क्रमविकासः सञ्जात इति विचारयितुं लेखस्यास्यावतरणम्। विषयोऽयं महान् व्यापकः। एतादृशे क्षुद्रे निबन्धे इयता

महता विषयेण सह न्यायं कर्तुं न शक्यते इत्यहं मम सीमानमपि जानामि । अतः संक्षेपतः केवलं समासशक्तेः परिवर्तनबिन्दव एवात्र प्रदर्शयिष्यन्ते । यद्यपि समासशक्तेः क्रमविकास इत्यनया प्रस्तावनयैव लक्षणावादिनः नैयायिक–मीमांसकाः स्वतः पृथक्– पार्श्वे प्रस्थापितास्तथापि विरोधिमतोपस्थापनं विना सैद्धान्तिकमतस्योपस्थापनं, प्रतिपादनं च सम्यक्तया कर्तुं न शक्यते इति धिया प्रसङ्गतस्तयोः सम्प्रदाययोः विचारः संक्षिप्य प्रस्तूयते । नैयायिकेषु केवलं नव्या एव स्व-स्वग्रन्थेषु समासार्थविषये विचारान् प्रस्तुवन्ति । नव्येष्वेपि गङ्गेश-जगदीशयोरवदानमुल्लेखनीयं वर्तते ।

## नैयायिकाभिमतम्

विषयेऽस्मिन् नैयायिका एकस्मिन् पक्षे वैयाकरणेभ्यः, पक्षान्तरे च मीमांसकेभ्योऽसहमताः दृश्यन्ते । नैयायिकमतानुसारं शक्तिः ईश्वरेच्छया मानवेच्छया वा सङ्केतिता भवति । साऽपि केवलमेकस्मिन्नेव पदे अर्थात् अवयवे स्वीकर्तुं शक्यते न तु समुदाये इति तेषां युक्तिः ।[5] वैयाकरणास्तु समुदायशक्तिमङ्गीकृत्य समासे एकार्थीभावसामर्थ्यं[6] वाक्ये च व्यपेक्षासामर्थ्यं स्वीकुर्वन्ति । किन्तु नैयायिकाः ये समुदायशक्तौ न विश्वसन्ति ते समासेऽपि वाक्ये इव व्यपेक्षासामर्थ्यं समर्थयन्ति । शक्तेरेकविधत्वमङ्गीकुर्वतां तेषां समुदायशक्तिस्वीकारे प्रवृत्तिरेव न स्यात् । अतः समासस्थले विशिष्टार्थबोधाय ते लक्षणायाः समर्थनं कुर्वन्तः दृश्यन्ते । राजपुरुष इति तत्पुरुषसमासे अवयवाभ्यां राजरूपोऽर्थः पुरुषरूपोऽर्थश्चावगम्यते । सम्बन्धिरूपोऽर्थस्तु लक्षणया प्राप्तुं शक्यते पूर्वपदात् राज्ञः । अतः समुदायशक्तेरावश्यकता नास्ति । कर्मधारयसमासस्थले तु नैयायिकाः न शक्तिं न वा लक्षणामङ्गीकुर्वन्ति । अन्वयबलात् विवक्षितार्थः बोद्धुं शक्यते इति तेषां युक्तिः ।[7] नीलं घटमानयेत्यादौ नामार्थयोः विशेषण-विशेष्ययोः अन्वयबोधः आकाङ्क्षादिभिः भवितुमर्हति । न केवला प्रकृतिः प्रयोक्तव्या इति भाष्यवचनमनुरुध्य विभक्तेः प्रयोगस्त्वत्र केवलं पदसाधुत्वार्थः भवति । उपकुम्भमित्याद्यव्ययीभावे समासार्थः उत्तरपदे षष्ठ्यर्थलक्षणया बुध्यते । अतोऽत्रापि समासे शक्तेरावश्यकता नास्ति ।[8] द्वन्द्वसमासस्थले पदलक्षणया समुदायार्थोऽवगम्यते ।[9] बहुव्रीहौ पदद्वये निरूढलक्षणास्वीकारे अन्यपदार्थप्रधानरूपोऽर्थः प्राप्तुं शक्यते ।[10] अतः समासे समुदायशक्तेरावश्यकतैव न भवति । नैयायिकेषु केचन यद्यपि बहुव्रीहौ



लक्षितलक्षणां स्वीकुर्वन्ति किन्तु तत्र गौरवं प्रदर्श्य गङ्गेशः निरूढलक्षणामेव पुनः स्थापयति ।[11] पक्षान्तरे वाक्यलक्षणाप्रत्याख्याने नैयायिका मीमांसकेभ्योऽपि पृथग् भवन्ति ।[12]

## मीमांसकाभिमतम्

वेदस्य सर्वथा प्रामाणिकत्वमङ्गीकुर्वतां मीमांसकानां कृते शब्दार्थविषयिणी समस्या न तथा गम्भीराऽस्ति यथा नैयायिक-वैयाकरणानां कृते । किन्तु तथापि समासार्थविचारे ते उदासीनाः न सन्ति । नैयायिकसरणिमनुसृत्य तेऽपि लक्षणया समासार्थः बुध्यते इत्यभिप्रयन्ति । भाट्टसम्प्रदाये कुमारिलं विहायान्ये सोमनाथ-खण्डदेवादयः समासे लक्षणामेवाङ्गीकुर्वन्ति । कुमारिलभट्टस्तु समासे समुदायशक्तिमनुमनुते । समासस्थले एकतरस्मिन् पदे शक्तेर्निर्धारणं दुष्करं भवतीत्यतः समुदायशक्तिरेव वरमिति कुमारिलभट्टस्य युक्तिः ।[13] शबरस्वामी तथा भट्टसम्प्रदायस्य परवर्तिनो मीमांसका यद्यपि समासे लक्षणामिच्छन्ति, तथापि कर्मधारयस्थले ते न लक्षणां न वा समुदायशक्तिमनुमन्वते । निषाद-स्थपत्यादिषु कर्मधारयेषु अवयवशक्तिरेव पर्याप्ता भवतीति ते स्वकीयमाशयं स्पष्टीकुर्वन्ति । अत्र समासघटकौ पूर्वोत्तरावयवौ अवयवशक्त्या एव स्वमर्थं बोधयतः । अनन्तरं तयोरभेदान्वयेन निषादाभिन्नः स्थपतिः अथवा निषाद एव स्थपतिः इत्येवंविधः अर्थः अवगम्यते ।[14] शबरस्वामिमतानुसारं कर्मधारय-तत्पुरुषयोर्मध्ये कर्मधारय एव बलीयान् भवति । लक्षणापेक्षया शक्तेः प्राधान्यमेवात्र कारणम् ।[15] कुमारिलभट्टस्तु शबरस्वामितः भिन्नं मतं प्रस्तौति । कर्मधारये अवयवशक्तिमनादृत्य स समुदायशक्तिमेवाभिप्रैति । समासेऽस्मिन् अवयवशक्तिस्वीकारे द्वयोः पदयोर्मध्ये सामानाधिकरण्यस्थापने समस्या आपतेदिति तस्य युक्तिः । द्वयोः पदयोर्मध्ये एकशक्त्यभावे एकपदार्थत्वाभावात् सामानाधिकरण्यं न सम्भवेत् ।[16] एवमवयवशक्तिस्वीकारे एकार्थीभावाभावे, सामानाधिकरण्याभावे च समास एव न सम्भवेत् । अतः कर्मधारये समुदायशक्तिस्वीकारः ज्यायान् श्रेयांश्च प्रतिभाति ।

बहुव्रीहि-समासप्रसङ्गे अन्यपदार्थः लक्षणयाऽवबुध्यते इति मीमांसकाः स्पष्टमुद्घोषयन्ति । अवयवार्थस्तु अवयवशक्त्यैव प्राप्तुं शक्यते ।[17] अत्रापि कुमारिलभट्टः सामानाधिकरण्याभावे लक्षणा न सम्भविष्यतीति युक्तिं प्रस्तौति ।

अतः समासशक्तिरावश्यकीति तस्याशयः ।[18] खण्डदेवः स्वकीये ग्रन्थे मीमांसाकौस्तुभे बहुव्रीहौ निरूढलक्षणामभिप्रैति ।[19] अन्ये च मीमांसकाः बहुव्रीहिप्रसङ्गे वाक्यलक्षणायां विश्वसन्ति । यथा गभीरायां नद्यां घोष इत्यादिषु वाक्येषु वाक्यनिष्ठः समुदायार्थः वाक्यलक्षणया बुध्यते, तथाऽत्रापि समुदायार्थमाश्रित्यैव अन्यपदार्थः तिष्ठति यस्य बोधः वाक्यलक्षणां विना न सम्भविष्यति ।

### वैयाकरणाभिमतम्

समासशक्ति-विचारप्रसङ्गे वैयाकरणान् कोटिद्वये स्थापयितुं शक्यते । प्रथमकोटौ तेषां वैयाकरणानाम् अन्तर्भाव इष्यते ये तावत् समासशक्त्यतिरिक्त-शक्त्यादिशब्दान् नोल्लिखन्ति । परन्तु तेषां समासार्थ-सिद्धान्त-विश्लेषणादेव स्पष्टीभवति यत् ते समासे शक्तिमेवाभिप्रयन्ति । एतस्मिन् कोटौ पाणिनि-कात्यायन-पतञ्जलि-भर्तृहर्यादीनां नामानि उल्लेखयोग्यानि । द्वितीयकोटौ ते एव वैयाकरणा गृहीताः ये साक्षात् समासशक्ति-समुदायशक्त्यादि-शब्दग्रहणपूर्वकं समासे शक्तिमङ्गीकुर्वन्ति । अस्मिन् कोटौ भट्टोजिदीक्षितस्य नाम अग्रगण्यम् । कौण्डभट्ट-नागेशभट्टादिभिः स्वस्वग्रन्थेषु समासशक्ति-निरूपणाख्यं किञ्चिद् विशिष्टं प्रकरणमेव योजयन्ति । वैयाकरणेषु प्राचीना अपि समासेऽतिरिक्तशक्तिं नानुमन्वते । अवयवशक्त्या पूर्वोत्तरपदयोर्बोधः जायते । लुप्ता च विभक्तिः पुनः स्मृता सती विभक्त्यर्थं बोधयति । अतः समासार्थावबोधाय न शक्तेः न वा लक्षणाया आवश्यकता वर्तत इति तेषां युक्तिः ।[20] वस्तुतः समुदायशक्तिकल्पनायां नव्यवैयाकरणानामेव पूर्णं योगदानं वर्तते ।

### पाणिनिः

समुदायशक्तिः समासार्थं बोधयतीति पाणिनिः न कुत्रापि शब्दशः वदति । परन्तु अष्टाध्याय्या अनेकेषु सूत्रेषु एवंविध आशयः द्रष्टुमनुमातुं च शक्यते । तद्यथा निर्मक्षिकमिति समस्तपदस्याभीष्टोऽर्थः तत्रत्ययोर्द्वयोरप्यवयवयोर्न फलति । अवयवशक्त्या मक्षिकाणामभाव इति अर्थः अवगम्यते, न तु जनशून्यरूपोभीष्टोऽर्थः समुदायशक्तिस्वीकारे सत्येव तादृशोऽर्थः उपलभ्यते । एवमेव समुदायशक्त्यभावे उन्मत्तगङ्गमिति समस्तपदेन तन्नाम्ना प्रसिद्धः देशः, खट्वारूढ इति समस्तपदेन दुर्जनरूपोऽर्थः, उद्दालकपुष्पभञ्जिका इति समस्तपदेन क्रीडाविशेषोऽर्थः, गेहेशूर :त्यस्य भीरुरूपोऽर्थः, वातच्छेद्य-काकपेयादीनां



समस्तपदानामर्थवादवचनरूपोऽर्थः, अवतप्तेनकुलस्थितम् इत्यस्य चापल्यार्थः नावगम्येत । अत एव समर्थः पदविधिः पा. २.१.१, अव्ययं विभक्ति-समीप..,, पा. २.१.६, अन्यपदार्थे च संज्ञायाम् पा. २.१.२१, खट्वा क्षेपे पा. २.१.२६ , कृत्यैरधिकार्थवचने पा. २.१.३३ नित्यं क्रीडाजीविकयोः पा. २.२.५७, पात्रे समितादयश्च पा. २.१.४८, क्षेपे पा. २.१.४, अनेकमन्यपदार्थे पा. २.२.२४ तथा च ध्वांक्षेण क्षेपे पा. २.१.४२ इत्यादिषु सूत्रेषु समुदायशक्तिविषये पाणिनेः मौनस्वीकृतिरासीदिति अनुमातुं शक्यते ।

### कात्यायनः

समर्थः पदविधिरिति सूत्रव्याख्यानप्रसङ्गे कात्यायनः पृथगर्थानाम् एकार्थीभाव इति वार्त्तिकं पठति । वस्तुतः समास-प्रसङ्गे एकार्थीभाव-कल्पना समुदायशक्तिमन्तरा न सम्भवति । अतः कात्यायनस्येदमेकमेव वार्त्तिकं तस्य समुदायशक्तिस्वीकारे पर्य्याप्तं प्रमाणं भवितुमर्हति । तस्यैव सूत्रस्य व्याख्यायां द्वेऽपरे वर्त्तिके स्तः ये परम्परया समुदायशक्तिसमर्थके सिद्ध्यतः । तद्यथा—

१. सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसम्बन्धः स्वरः,

२. संख्याविशेषो व्यक्ताभिधानम् उपसर्जनविशेषणं च योगः ।

एते वर्तिके असमस्तपदेषु अर्थात् वाक्येषु तां शब्दव्यवस्थां सूचयतः या व्यवस्था समासेऽङ्गीकर्तुं न शक्यते । समासे तु काचित् नियतव्यवस्थाऽपेक्ष्यते । तद्यथा - पूर्वपदे विभक्तिलोपः, पूर्वोत्तरपदयोर्मध्ये अतिरिक्तपदस्य सर्वथाभावः, समस्तपदानां नियतक्रमः तथा च एकस्वरः । सा च नियतव्यवस्था समुदायशक्तिमन्तरा न सम्भवति ।

### पतञ्जलिः

पतञ्जलिरपि महाभाष्ये समासशक्तिपदस्य साक्षान्निर्देशं न विदधाति । परन्तु तत्र एकार्थीभाव-[21]जहत्स्वार्थवृत्ति-[22]समुदायसामर्थ्यादीनां[23] शब्दानां प्रयोगः दृश्यते ये शब्दाः प्रकारान्तरेण समुदायशक्तिमेव समर्थयन्ति । सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो न[24] इति भाष्यवचनमपि समुदायशक्तेः प्रबलसमर्थकं प्रतिभाति । जहत्स्वार्थवृत्तिविषये पतञ्जलेः सुदीर्घं व्याख्यानमपि पतञ्जलेः समासशक्तिविषयिणीं सचेतनतां सूचयति । अपरं च पृथगर्थानामेकार्थीभावः समर्थनमित्युच्यते । क्व पुनः पृथगर्थानि, क्व एकार्थानि,

वाक्ये पृथगर्थानि राज्ञः पुरुष इति, समासे पुनरेकार्थानि राजपुरुष इति[25] इत्यादिभाष्यवचनं समासेऽवयवशक्तेः प्रत्याख्यानं करोति समुदायशक्तिं च प्रतिष्ठापयति ।

**भर्तृहरिः**

पतञ्जलेः समर्थकः भर्तृहरिरपि समासस्य अखण्डत्वे, अखण्डार्थत्वे च विश्वसिति । समुदायशक्तिं विना समासस्याखण्डार्थत्वं सर्वथा व्याख्यातुं न शक्यते । "शब्दान्तरत्वादत्यन्तभेदो वाक्यसमासयोः"[26] इति वाक्यपदीयवचनं वाक्यसमासयोर्भेदं समासे एकार्थत्वमभिप्रैति । "एकार्थीभाव एवातः समासाख्या विधीयते" इत्यपि वाक्यपदीयवचनं समासे एकार्थीभावसामर्थ्यं समर्थयति । तेन प्रकारान्तरेण समासशक्तेः समर्थनमपि भवति ।

**भट्टोजिदीक्षितः**

"समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्"[28] इति कारिकार्धेनैव सिद्ध्यति यत् भट्टोजिदीक्षितः समासे समुदायशक्तिमिच्छति । यथा पङ्कज-रथकारादिपदेभ्यः समुदायशक्त्यैव विशेषार्थस्य बोधो भवति तथा समासादिपञ्चवृत्तिष्वपि समुदायशक्तिः स्वीकार्या इति कारिकार्धस्य तात्पर्यम् । समासे व्यपेक्षा-सामर्थ्याङ्गीकारे बह्व्यः समस्या आपतिष्यन्तीति अभिप्रायं द्रढीकर्तुं स वदति—

> **बहूनां वृत्तिधर्माणां वचनैरेव साधने ।**
> **स्यान्महद् गौरवं तस्मादेकार्थीभाव आश्रितः । ।[29]**

समासे व्यपेक्षारूपे सामर्थ्येऽङ्गीकृते धवखदिरौ, घनश्यामः, निष्कोशाम्बिः, गोरथः, घृतघटः, गुडधानाः, केशचूडः, सुवर्णालङ्कारः, द्विदशाः, सप्तपर्ण इत्यादिषु च-इव-क्रान्त-युक्त-पूर्ण-मिश्र-संघात-विकार-सुच्प्रत्ययलोप- वीप्साद्यर्थं वक्तुं पृथग्वचनं कर्तव्यं स्यात् । येन महद् गौरवमपि भवेत् । प्राप्तोदक-ऊढरथ-उपहृतपशु-इत्यादिषु अषष्ठ्यर्थ-बहुव्रीहिषु पूर्वपदे लक्षणा स्वीकर्तव्या अथवोत्तरपदे इत्यत्र विनिगमना नास्ति । अतः तदर्थं वचनान्तरमपि कल्पनीयं स्यात् । समासे लक्षणायामङ्गीकृतायां अवयवशक्त्या अर्थावबोधपरम्पराऽपि त्यक्तव्या स्यात् । अत एव समुदायशक्तिः समासे सर्वथा स्वीकार्या प्रतिभातीति विमृश्य उपरंर्तुं वदति—



> **अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना ।**
> **क्लृप्तत्यागश्चास्ति तव तत्किं शक्तिः न कल्पये । ।[30]**

समासे समुदायशक्तेरावश्यकता इयता स्पष्टशब्देन भट्टोजिदीक्षितात् प्राक् न केनापि उक्ता । अतः सोऽस्य सिद्धान्तस्य संस्थापक आसीदिति निःसङ्कोचं वक्तुं शक्यते ।

**कौण्डभट्टः/नागेशभट्टः**

कौण्डभट्टेन वैयाकरणभूषणे तथा च भूषणसारे एवमेव नागेशेन मञ्जूषात्रय्यां समासशक्तिनिरूपणाख्यं विशिष्टं प्रकरणं संयोजितम् । तत्र तौ भट्टोजिदीक्षितोक्तसमासशक्तिपरक-कारिकाणां व्याख्यानं, पल्लवनं च कृत्वा समासशक्तिसिद्धान्तस्य प्रख्यापने सम्पोषणे च स्वकीयं योगदानं कृतवन्तौ ।

भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकारिकायां समासशक्तिविषये यानि तथ्यानि उपस्थापितानि तानि पाणिनिकात्यायनपतञ्जलिभर्तृहर्यादीनां प्राचीनवैयाकरणानां ग्रन्थेषु सूक्ष्मरूपेण सन्निविष्टान्यासन्निति भूषणमञ्जूषादीनां ग्रन्थानामध्ययनाज्ज्ञायते । कौण्डभट्ट-नागेशभट्टौ समासशक्तिसिद्धान्तस्य मूलरूपं विश्लेषयितुं बहुवारं सूत्र-वार्तिक-भाष्य-वाक्यपदीयपङ्क्तीरुद्धरतः । कौण्डभट्टेन बहुवारं कैयट-हरदत्तौ समालोचितौ यौ समासशक्तिविचारप्रसङ्गे यदा कदा नैयायिकमतमनुसरतः । तथा चोक्तं वैयाकरणभूषणे—

> **कैयटः हरदत्तश्च यां व्यवस्थां प्रचक्रतुः ।**
> **सा न्यायभाष्यानुगुणा नेत्युपेक्ष्येति विद्महे । ।[31]**

कौण्डभट्टस्य हरदत्तोक्तोऽपास्तः[32] कैयटोक्तः विद्वद्भिर्नादरणीयः[33], तस्मान्न कैयटहरदत्तादिभिरुक्तं युक्तम्[34] इत्यादि-भूषणवचनमपि उपर्युक्तं तथ्यं सम्पुष्णाति ।

वस्तुतः कौण्डभट्टनागेशभट्टयोः समासशक्ति-विषयक-विचारोऽति-व्यापकोऽस्ति । गम्भीरतया सिद्धान्तप्रतिपादनं लेखस्योद्देश्यं नासीत् । अत्र तु सिद्धान्तस्यास्य कथं क्रमविकासः सञ्जात इति विचारणीय आसीत्, यदत्र सूत्रशैल्या प्रतिपादितम् ।

**उपसंहारः**

१. रथन्तर-सप्तपर्ण-शुश्रूषेत्यादौ अवयवार्थप्रतीत्यभावात् वैयाकरणैः समासे समुदाये एव शक्तिः स्वीक्रियते न त्ववयवे ।

२. शक्तिलक्षणयोर्मध्ये लक्षणायाः स्वीकारे गौरवमापततीत्यतः वैयाकरणाः समासे लक्षणां निराकुर्वन्ति समुदायशक्तिं च प्रतिष्ठापयन्ति ।

३. समासे लक्षणाङ्गीकारे पदलक्षणाऽङ्गीकर्तव्या वाक्यलक्षणा वा, समुदायलक्षणाङ्गीकर्तव्या निरूढलक्षणा वा, पदलक्षणायामपि पूर्वपदे लक्षणाऽङ्गीकर्तव्या उत्तरपदे, उभयपदे वा इत्याद्यनेकविधाः जिज्ञासाः भवन्ति । विभिन्नैः भिन्न-भिन्न-समासेषु भिन्ना भिन्ना लक्षणा स्वीकृता । तेन गौरवं भवति । पक्षान्तरे समासे समुदायशक्तिस्वीकारे सर्वत्रैक एव नियमः ।

४. जघन्यवृत्तित्वात् समासे लक्षणा न स्वीकर्तव्या परन्तु समुदायशक्तिरेव ।

५. तात्पर्यानुपपत्तिं विना लक्षणाया उपयोगोऽनुचितः शास्त्रविरुद्धश्च । यदाऽभीष्टोऽर्थः शक्त्या प्राप्तुं शक्यते तदा लक्षणाया उपयोगः निरर्थक एव । समस्तपदे समुदायार्थबोधाय समुदायशक्तिरेवोपयुक्ता स्यात् न त्ववयवशक्तिः ।

६. वैयाकरणेषु नित्यशब्दवादिनः पदस्फोटेन समासार्थबोधः भवतीति प्रतिपादयन्ति । कार्यशब्दवादिनस्तु समुदायशक्तिमेवात्र कारणत्वेन स्वीकुर्वन्ति ।

**सन्दर्भसङ्केतः**

1. महाभाष्यम्, पा. २.१.६, २.१.२०
2. समासस्तु चतुर्धेति प्रायोवादस्तथापरः ।
   योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च । । वैयाकरणसिद्धान्तकारिका-२६
3. समासशक्तिनिर्णय आफ कौण्डभट्ट, सम्पा० बनमाली बिश्वाल, टी. २, पृ. १००
4. वै. सि. का. – २६



5. यः शब्दः यत्रेश्वरेण सङ्केतितः स तत्र शक्तः साधुरित्युच्यते, तत्त्वचिन्तामणिः, शब्दखण्डः, विब्लिओथेका इण्डिका, कलकत्ता, १६०१, पृष्ठ ६४६
6. अथैतस्मिन् 'व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतविशेषः स वक्तव्यः, महाभाष्यम्, पा. २.१.१
7. कर्मधारये तु न शक्तिर्न वा लक्षणा, ताभ्यां विनाऽपि विवक्षितार्यान्वयबोधोपपत्तेः तत्त्वचिन्तामणिः, शब्दखण्डः पृ० ७७७
8. उपकुम्भमित्याद्यव्ययीभावे.....अतस्तत्रोत्तरपदे षष्ठ्यर्थलक्षणा न तु समासे शक्तिः तत्रैव पृ० ७८५-७८६
9. नापि द्वन्द्वे शक्तिरेव पदलक्षणयैवानेकार्थोपस्थितिसम्भवात्, तत्रैव, पृ० ७६५
10. अस्तु तर्हि बहुव्रीहिस्थपदद्वये निरूढलक्षणा - तत्रैव, पृ० ७४६; शब्दशक्तिप्रकाशिका - ४३
11. एकपदलक्षणातो लक्षितलक्षणाया जघन्यत्वात्, तत्त्वचिन्तामणिः, पृ० ७३६
12. वाक्ये निरर्थकतया स्वार्थसम्बन्धाभावेन लक्षणानिषेधात् अत्रैव पदलक्षणयैवोपपत्तेश्च, तत्रैव, पृ० ७३३
13. (क) सर्वत्र योगिकैः शब्दैः द्रव्यमेवाभिधीयते ।
    नहि सम्बन्धवाच्यत्वं सम्भवत्यतिगौरवात् । ।
    तन्त्रवार्तिकम् - ३.१.६.१२

    (ख) अथवा समुदायात् उत्पादाद् उभयत्रापि द्रष्टव्या -
    टुप्टीका - ६.१.१३.५१
14. (क) निषादपदमेवातः षष्ठ्यर्थः लक्ष्येदिदम् ।
    कर्मधारयपक्षे तु न काचिदपि लक्षणा ।
    निषाद एव स्थपतिरतः स्मृत्या प्रतीयते ।
    शास्त्रदीपिका - ६.१.१.३.५१.

    (ख) स्थपतिर्निषादः स्यात् निषाद एव स्थपतिर्भवितुमर्हति । कस्मात् ? शब्दसामर्थ्यात् । निषादं हि निषादशब्दः शक्नोति वदितुं श्रवणेनैव,
    शाबरभाष्यम्– ६.१.१.३.५१
15. समानाधिकरणसमासस्तु बलीयान् तत्र हि स्वार्थे शब्दो वृत्तौ भवतः श्रुतिलक्षणाविषये च श्रुु:ि र्याय्या न लक्षणा - तत्रैव

16. पिङ्गाक्ष्यैकहायनीशब्दौ द्वावपि सामानाधिकरण्याद् एकद्रव्यवचनम् – तन्त्रवार्तिकम् - ३.१.६.१२

17. बहुव्रीहौ तु पूर्वोत्तरयोः पदयोः विद्यमानस्वार्थत्वात् अन्यस्य वाऽप्यधिकस्य शब्दावयवस्याभावात् पिङ्गत्वाक्षित्वाभ्याम् एवं च द्रव्यप्रत्ययसिद्धेर्न शक्यम् अभिधेयत्वं कल्पयितुम् –तत्रैव, ३.१६.१२

18. न त्वेतद् व्यापित्वेन शक्यमाश्रयितुं कर्मधारये इत्येतद् व्यापित्वेन स्यात् सर्वथा लक्षणानिमित्तोपपत्तेः, तत्रैव

19. यत्र वा बहुव्रीह्यादौ वाचकान्तरसत्त्वम्, तत्र पदद्वयस्यैव स्वार्थविशिष्ट्य पदार्थे अन्यपदार्थमात्रे वा निरूढलक्षणा – मीमांसाकौस्तुभः – ३.१.१२

20. (क) प्राचीनवैयाकरणोक्तरीत्या क्लृप्तशक्त्योपपत्तिः, समासशक्तिनिर्णयः, सम्पा. डॉ० बनमाली बिश्वालः, टी ५४, पृ० १४७

(ख) राज्ञः पुरुष इत्यादौ विग्रहे समासाभिधानाल्लुप्ता स्मृता षष्ठ्यैव सम्बन्ध-स्मारिका अतो न लक्षणा न वा शक्तिरित्येके, तत्त्वचिन्तामणिः, पृ० ७५६

21. महाभाष्यम्, संपा० किल्हर्ण, भाग – १, पृ ३६१
22. तत्रैव, पृ० ३६४
23. तत्रैव, पृ० ३६७
24. तत्रैव, पृ० ३६१
25. तत्रैव, पृ० ३६१-३६२
26. वाक्यपदीयम् ३.१४.४६
27. तत्रैव, ३.१४.४४
28. वै. सि. का. - ३१
29. तत्रैव - ३२
30. तत्रैव ३३
31. समासशक्तिनिर्णयः, सम्पादक–बनमाली बिश्वाल, टी ६-१०, पृ० १०६
32. तत्रैव, टी १५, पृ० ११४
33. तत्रैव, टी १५, पृ० ११३
34. तत्रैव, टी० १७, पृ० ११५ ।

❖



# जगन्नाथाभिमता प्रतिभा

डा० अरुण कुमार मण्डलः

काव्यलक्षणज्ञानं विना काव्यज्ञानं न सम्भवति । अतएवाचार्यजगन्नाथः प्रथमं तावत् 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इत्यादिना काव्यलक्षणं निरूपितवान् । यद्यपि काव्यतत्त्वसामान्यज्ञानेनापि काव्यज्ञानं सम्भवति तथापि काव्यतत्त्वस्य रमणीयार्थप्रतिपादकशब्दत्वरूपत्वात् तत्रापि प्रकारान्तरेण लक्षणज्ञानमपेक्ष्यते ।

काव्यं प्रति किं कारणम् ? यस्मात् कारणात् कवीनां काव्यनिर्माणे प्रवृत्तिर्जायते इत्याकाङ्क्षायां जगन्नाथ आह - 'तस्य च कारणं कविगता केवला प्रतिभा' । कारणं विना कार्य्यं न सम्भवति; अतः काव्यत्वावच्छिन्नं प्रति प्रतिभा कारणम् । प्रतिभायाः काव्यकारणत्वं प्रायः सर्वैरालङ्कारिकैरङ्गीक्रियते एव । किन्तु रुद्रट-वामन-जगन्नाथादयः केचन आलङ्कारिकाः केवलं प्रतिभां, दण्डि-मम्मट-वाग्भट-पीयूषवर्षादयस्तु प्रतिभा-व्युत्पत्त्यभ्यासरूपं त्रितयमेव काव्यस्य कारणत्वेन स्वीकुर्वन्ति । अस्माकमालोचनन्तु पण्डितराजसम्मतां प्रतिभां द्वारीकृत्य एव भविष्यति । तेन विशिष्टकाव्यं प्रति प्रतिभाव्युत्पत्त्यभ्यासानां समुदायस्य कारणता न स्वीकृता ।

का सा प्रतिभा ? 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' इत्यस्ति प्रसिद्धिः । क्वचिच्च 'प्रज्ञा'पदस्थले 'बुद्धि'रिति पाठः । एतत्प्रसङ्गे अभिनवगुप्तस्य साहित्यगुरोः तौताचार्यस्य 'काव्यकौतुक' नामकस्य लुप्तनिबन्धस्य प्रसिद्धा इयं कारिका उद्धारयोग्या –

स्मृतिर्व्यतीतविषया मतिरागामिगोचरा ।
बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता ।।

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।
तदनुप्राणनाजीवद्वर्णनानिपुणः कविः।
तस्य कम स्मृतं काव्यम्.....................।।

अतः शीघ्रतया नव-नवविषयाकार-परिणतिक्षमा बुद्धिरेव प्रतिभा। यद्यपि नेयं केवला काव्यघटनानुकूला अपि तु सर्वविद्यानामनुकूला तथापि विशिष्टतया सा **'काव्यघटनानुकूलशब्दार्थोपस्थितिं'** रूपा एव इत्युक्तं जगन्नाथेन।

ननु काव्यं प्रति कथं प्रतिभा कारणम् ? काव्यस्य शब्दात्मकतया गुणत्वादाकाशधर्मत्वमेव, प्रतिभायास्तु बुद्ध्यात्मिकतया आत्मधर्मत्वमेव; तर्हि काव्यप्रतिभयोः सामानाधिकरण्यविरहात् कथं कार्यकारणभाव इति चेन्न।

काव्यविषयकज्ञानसमवायित्वसम्बन्धेन काव्यं प्रति समवायसम्बन्धेन प्रतिभा कारणामिति काव्यप्रतिभयोः आत्मनिष्ठः कार्यकारणभावः। कार्यकारणाभावे अनुगतधर्मं विना अनुगतकार्यभावानुपपत्तेः। अतः काव्यनिष्ठकार्यतायाः अवच्छेदकमत्र काव्यत्वं प्रतिभानिष्ठकारणताया अवच्छेदकञ्चात्र प्रतिभात्वम्। प्रतिभात्वञ्च न प्रत्यक्षसिद्धजातिविशेषः अपि तु कार्यकारणभावात्मकानुकूलतर्कमूलकादनुमानात् प्रमाणिता अत्रायमनुमान-प्रकारः। काव्यत्वावच्छिन्नकार्यतानिरूपिता प्रतिभानिष्ठा या कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद् घटनिष्ठकार्यतानिरूपित-दण्डनिष्ठ-कारणतावदित्यनुमानेन प्रतिभात्वस्य जातित्वसिद्धिः। उक्ता कारणता अवश्यं किञ्चिद्धर्मावच्छिन्ना भवति, निरवच्छिन्नायाः कारणतायाः असम्भवात्।

अत्र प्रतिभां प्रति किं कारणमित्याकाङ्कायां जगन्नाथ आह— **'क्वचिद्देवतामहापुरुषप्रसादादिजन्यमदृष्टम्, क्वचिच्च विलक्षणव्युत्पत्तिकाव्य-करणाभ्यासौ'**। जगन्नाथस्यात्रायमभिप्रायः यत् काव्यं कविकर्म; काव्यं प्रति प्रतिभा कारणम्। सा च प्रतिभा न नित्या, अपि तु कार्यरूपैव। अतः कारणं विना प्रतिभायाः अपि असम्भवात् प्रतिभां प्रति देवतामहापुरुषप्रसादादिजन्य-मदृष्टमेव कारणत्वेन कल्प्यते, क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकरणाभ्यासावेव कारणत्वेन कल्प्येते। न तु त्रयमेव, तर्हि स्वातन्त्र्येण प्रतिभां प्रति महापुरुषप्रसादादिजन्यमदृष्टं कारणं; प्रतिभां प्रति स्वातन्त्र्येण विलक्षणव्युत्पत्त्यभ्यासौ च कारणमिति कार्यकारणभावद्वयम्। शक्त्यादीनां



समुदितानां त्रयाणां कारणत्वमिति मतं निरसयितुं प्रकारान्तरेण उक्तकार्यकारणभावद्वयस्य कल्पना क्रियते रसगङ्गाधरकृता। कविकर्णपूरप्रभृतीनां बाल्ये व्युत्पत्त्यभ्यासवैधूर्येऽपि केवलं महापुरुषप्रसादादि-जन्याददृष्टादेव प्रतिभोत्पत्तेर्दर्शनात् व्यतिरेकव्यभिचारः स्यात्। अतः शक्त्यादीनां समुदितानां त्रयाणां कारणत्वं न सम्भवति। नन्वत्र यदि प्रतिभां प्रति देवतादिप्रसादादिजन्यमदृष्टं कारणं प्रतिभां प्रति व्युत्पत्त्यभ्यासौ च कारणमिति कार्यकारणद्वयकल्पनायां परस्परजन्यकार्ये व्यभिचारः स्यात्। यत्र देवतादिप्रसादजन्याददृष्टात् प्रतिभायाः उत्पत्तिर्जायते तत्र व्युत्पत्त्यभ्यास-रूपकारणविरहाद् व्यतिरेकव्यभिचारः एवं व्युत्पत्त्यभ्यासाभ्यामेव यत्र प्रतिभायाः उत्पत्तिर्जायते तत्र देवतादिप्रसादजन्याददृष्टरूपकारणविरहाद् व्यतिरेकव्यभिचार इति चेन्न।

अत्र प्रतिभागते कार्यतावच्छेदके किञ्चिद्वैलक्षण्यं स्वीकरणीयमेव। तच्च वैलक्षण्यमव्यवहितोत्तरजायमानत्वमेव। तथाहि देवतादिप्रसादजन्यादृष्टाद-व्यवहितोत्तरजायमानां प्रतिभां प्रति देवतादिप्रसादादिजन्यमदृष्टं कारणम्। एवं व्युत्पत्त्यभ्यासाव्यवहितोत्तरजायमानां प्रतिभां प्रति व्युत्पत्त्यभ्यासावेव कारणम् इति पृथक् पृथगेव कार्यकारणभावः कल्पनीयः। तेन परस्परजन्यकार्ये व्यतिरेकव्यभिचारो न। ननु यत्र कविकर्णपूरप्रभृतिषु बाल्ये वयसि व्युत्पत्त्यभ्यासाभ्यां विना प्रतिभायाः उत्पत्तिर्जायते तत्रापि जन्मान्तरीययोः व्युत्पत्त्यभ्यासयोः कारणत्वं सम्भवति। अतः शक्त्यादीनां त्रयाणामेव कारणत्वमस्तु इति चेन्न। यत्र अन्वयव्यतिरेकसिद्धायाः कारणता निर्णेया तत्र तादृशं जन्मान्तरीयं कारणत्वस्य कल्पनं समीचीनं यथा समाप्तिमङ्गलयोः कार्यकरणाभावे समाप्तिं प्रति मङ्गलस्य कारणताया अन्वय-व्यतिरेक-सिद्धायाः आगमादिप्रमाणेन निश्चितत्वात्। यद्यप्यत्र प्रत्यक्षश्रुतिर्नास्ति तथापि शिष्टाचारानुमितश्रुत्या तत्र मङ्गले कारणत्वं व्यवस्थापितम्। नास्तिकग्रन्थसमाप्तौ तु मङ्गलरूपकारणविरहात् समाप्तिरूपकार्यस्योत्पत्तौ व्यतिरेकव्यभिचारः स्यात्। उक्तव्यभिचारकारणार्थं तत्र जन्मान्तरीयं मङ्गलमनुमीयते। अत्र तु तथा न सम्भवति। यतः बलवत् श्रुत्यादि प्रमाणविरहात् कारणतायाः निर्णय एव न सम्भवति। अतः जन्मान्तरीय-व्युत्पत्त्यभ्यासयोः कल्पनमपि न सम्भवति।

अतः व्युत्पत्त्यभ्यासनिष्ठकारणतायाः निर्णयाभावे तूक्तस्थले व्यभिचारस्य उपस्थितेः प्राक् जातेः कारणतानिर्णये भ्रमात्मिका प्रतीतिरेव जायते। ननु यदि अत्रादृष्टरूपं कारणं कल्प्यते तर्हि पूर्वोक्तस्थले व्यभिचारः न स्यात् इति चेत् ? न। किञ्चत् कालं यावत् कार्यं कर्तुमशक्नुवतः कस्यचित् शत्रुताभ्यां पुरुषस्य केनापि प्रकारेण सञ्जाताभ्यां व्युत्पत्त्यभ्यासाभ्यां प्रतिभायाः उत्पत्तेर्दर्शनात्। यदि तत्रापि अदृष्टरूपं पुण्यमङ्गीक्रियते तर्हि न तत्र व्यभिचारः एतदपि वक्तुं न शक्यते। यतः जन्मनः प्रभृत्येव पुण्यरूपस्यादृष्टस्य विद्यमानत्वाद् व्युत्पत्त्यभ्यासाभ्यां प्राक् पुण्यरूपाददृष्टात् प्रतिभायाः प्रसक्तेः। नन्वत्र यदि प्रतिबन्धकस्य पापरूपस्यादृष्टस्य विद्यमानत्वात् व्युत्पत्त्यभ्यासाभ्यां प्राक् पुण्यरूपस्यादृष्टस्य सत्त्वेऽपि न तत्र प्रतिभायाः उत्पत्तिर्जायते इति चेन्न। तादृशानेकस्थलगतादृष्टद्वयकल्पनापेक्षया प्रतिभां प्रति क्लृप्तव्युत्पत्त्यभ्यासयोरेव कारणत्वम्। अतः पूर्वोक्तरूपेण पृथक् पृथगेव कार्यकारणभावः कल्पनीयः।

ननु यदि प्रतिभां प्रति अदृष्टयोः व्युत्पत्त्यभ्यासयोरुभयोरेव कारणत्वम् उभयतः एव काव्यत्वञ्च तर्हि भिन्नभिन्नकारणात् भिन्नभिन्नकार्योत्पत्तिरित्येवं-रूपस्य नियमस्य व्यभिचारो भवेत् ? न। तत्र काव्यमार्गे तारतम्यप्रसङ्गः स्यात्। अदृष्टजन्यायाः प्रतिभायाः उत्पन्नात् काव्यात् व्युत्पत्त्यभ्यासजन्यायाः प्रतिभायाः उत्पन्नस्य काव्यस्य भेदो भवेदेव। अतो नात्र व्यभिचारप्रसङ्गः।

सतोरपि व्युत्पत्त्यभ्यासयोः यत्र न प्रतिभोत्पत्तिः तत्र पापादेः प्रतिबन्धकस्वीकरणमपि कर्तुं शक्यते। अतः काव्यस्य प्रत्यक्षं कारणं कविगता केवला प्रतिभा। धारावाहिकतया जायमाना नवनवविषयावगाहिनी बुद्धिरूपेयं प्रतिभा व्युत्पत्त्यभ्यासाभ्यां पोषकत्वमाप्नोति। व्युत्पत्त्यभ्यासयोः काव्ये साक्षात् कारणत्वं नास्ति। परम्परया तु अस्त्येव। व्युत्पत्त्यभ्यासौ न काव्यस्य पोषकौ वर्धकौ वा किन्तु प्रतिभायाः पोषकौ वर्धकौ च। प्रतिभोपकारद्वारेण तौ काव्यस्योपकारकौ भवत इति पण्डितराजाभिमतमिति दिक्।

❖



# पञ्चवक्त्रस्य शिवस्य 'षोडशी'

डॉ० श्रीप्रकाश रायः

महाविद्यासु तृतीया "षोडशी" "श्रीविद्या" वेति नाम्ना प्रथितास्ति। इयमेव श्रीललिता-बाला-त्रिपुरसुन्दरी-सुन्दरी-त्रिपुरा-कामेश्वरी-राजराजेश्वरी-कला-सुभगाप्रभृतिभिरभिधानैर्गीयते लोकेषु। त्रिपुराया उपासकाश्चन्द्रमसः क्षयवृद्धी अनुसृत्य तान्त्रिकसाधनां स्वकीयां कुर्वन्ति। चन्द्रमसः षोडशकलाः प्रथिताः यासु पञ्चदशसंख्यका एव क्षयवृद्धिभावमुपयान्ति। या पुनः षोडशीकला सा तु क्षयवृद्धिभावाभावात् विकारशून्यत्वात् "नित्या" इति "अमृता" इति "षोडशी"ति चोच्यते। इमामेव षोडशीं वैयाकरणाः "पश्यन्ती"ति मन्यन्ते। दर्शनेषु इयमेवात्मतत्त्वरूपेण व्यवह्रियते। मन्त्रशास्त्रे मन्त्रस्वरूपत्वेन चापीयमेव विज्ञायते।

सामान्यतः योऽयं "पूर्णचन्द्र" इति जनानां सम्प्रत्ययः स वस्तुतः क्षयवृद्धिदोषवानस्ति। नहि पूर्णे वस्तुनि एवंविधस्य दोषलेशस्याप्यवकाशः। पूर्णता तु षोडश्यां कलायामेव दृग्गोचरीभवति। सा कलैव "नित्योदिता", "अमृतस्वरूपा", "अखण्डा" चास्ति। एषैव महात्रिपुरसुन्दरी ललिता सौन्दर्यानन्दस्य परमधामभूता-परकला-चिदेकरसा-श्रीविद्येत्यवधेयम्। षोडशकलासु पूर्वपञ्चदशकलानां कालात्सम्बन्धस्य विद्यमानत्वादेव प्रतिपत्तिथौ दर्शपौर्णमासस्य विधिरपि क्रियते।

सूर्य एव त्रैलोक्यं विदधाति, निखिलं प्राणिवर्गं सूते, अमृतं मर्त्यञ्च निर्माति। तद्यथा–

"सूर्य आत्मा जगतस्तस्थुषश्च।"
"निवेशयन्नमृतं मर्त्यं च।"
"नूनं जनाः सूर्येण प्रसूताः।।"

समुत्पन्नमात्र एव सूर्यो यदोग्रं रूपमादातुं प्रवृत्तस्तदा तस्य प्रसन्नतार्थं सोमस्याहुतिः दत्ता। आहुतिमवाप्य त्वसौ स्वकीयामुग्रतां त्यक्त्वा शिवरूपतामवाप। शिवभावापन्नः सूर्य एव जगत्सृजति। शिवात्मकः सूर्य एव पृथिव्यन्तरिक्षलोकाख्यं त्रैलोक्यं तत्रत्याः प्रजाश्च सृजति।

एषा शिवात्मिका सूर्यस्य शक्तिस्तन्त्रशास्त्रेषु पञ्चवक्त्रस्य शिवस्य शक्तिरित्युच्यते, एषैव च षोडशी ज्ञेया। यथा आग्नेयस्य रुद्रस्य शक्तिः तारा तथैव पञ्चवक्त्रस्य शिवस्य शक्तिः षोडशी। मध्याह्नकालिकः सूर्यः "घोरसूर्यः" इत्युच्यते। प्रातःकालिकस्तु स शान्तः शिवो ज्ञेयः। पञ्चवक्त्रः शिवः, पञ्चवक्त्रः अव्ययपञ्चवक्त्रः, अक्षरपञ्चवक्त्रो वा आत्माक्षरपरात्परस्य समष्टिरस्ति। अत एवैष षोडशी पुरुष इत्यपि गीयते। स्वयम्भू-परमेष्ठि-सूर्य-चन्द्र-पृथिवीषु केवलं सूर्य एव षोडश्याः पूर्णरूपेण विकासभावमाप्नोति नत्वन्यस्मिन्। स्वयम्भुवोऽव्ययत्वात् नहि तत्र षोडशीविकाससम्भावना। नापि यथार्थत्वात्पर-मेष्ठिनि। तत्र ह्यन्तर्लीना खलु षोडशी। सूर्यस्तु अग्निमयत्वाच्चिद्धर्मा अत एव तत्रस्थः चिदात्मा पूर्णतयोल्वणतामाप्नोति। स्वयम्भू-परमेष्ठि-सूर्यचन्द्राग्निसोमेषु सर्वत्राक्षरत्वस्य प्राधान्यं, तथापि यदेष सूर्य इन्द्रात्मकः स एव षोडश्याः विकासभावप्राप्तेः पात्रीभूतः। अत एव सूर्यरूप इन्द्रः षोडशी इत्युक्तः—

"इन्द्रो वै षोडशी।" इति (शतपथब्राह्मणः ४/२/५/१४)

बृहदारण्यकोपनिषदः **"स एव आत्मा वाङ्मयः प्राणमयो मनोमयः"** इति वचनानुरोधेन जगदाधारभूत आत्मा मनःप्राणवाङ्मयः निश्चीयते। सूर्ये मनसः प्राणस्य वाचश्चेति त्रयस्यापि सत्ता विद्यते। स्थावरजङ्गमात्मकस्य विश्वस्यात्मा सूर्योऽस्ति। सूर्यात् षोडशकलावतः पुरुषस्य यतः पूर्णतया विकासो भवत्यतः एष सूर्यः अस्य शक्तिरपि च षोडशी इत्युच्यते। इयमेव षोडशी शक्तिः भूर्भुवः स्वश्चेति ब्रह्मपुरत्रयं सृजति। अतएवैषा त्रिपुरसुन्दरी गीयते। शाक्तप्रमोदतन्त्रे महाविद्यैषा एवमुक्ता —

"बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम्।
पाशाङ्कुशशरांश्चापान्धारयन्तीं शिवां भजे।।"

इति तन्त्रशास्त्रस्य "त्रीणि ज्योतींषि स चेत् स षोडशी" इति वचनानुसारेण शिवः शिवा चोभौ त्रिभिर्ज्योतिर्भिः विश्वमभिव्याप्य वर्तमानौ



स्तः। एतानि त्रीणि ज्योतींषि (१) अग्निः (सूर्यतापरूपः) (२) प्रकाशः (३) चन्द्रः (आहुतसोमः) रूपाणि सन्ति। एतासां ज्योतिषं प्रतीकभूतं त्रिपुरसुन्दर्याः नेत्रत्रयमस्ति। एषा सोमाहुतिमवाप्य प्रशान्तिमेति। अत एव प्रातःकालिकः बालसूर्यः साक्षात् प्रकृतिः खलु त्रिपुरसुन्दर्याः। सूर्याज्जायमानाः प्रजाः सौरशक्ति-समाः भवन्ति। पृथिव्यपि सौरशक्तिसमन्वितास्ति। सा हि नहि जातु चिदात्मनः क्रान्तिवृत्तमाक्रामति स्वाकर्षणपाशेन निखिलं जगदाबध्य तिष्ठति च। त्रिपुरसुन्दर्याः पाशः पृथिव्या इमामेवाकर्षणशक्तिं लक्षयति। अक्षररूपस्य नियतिभूतस्य पाशस्य भीत्या एव सर्वे स्वकार्यं कुर्वन्ति। किञ्च सूर्योऽपि नियमतः तपति वह्निरपि सततं दहतीति ज्ञेयम्।

तदेवं त्रिपुरसुन्दरी लोकत्रयस्य नियमनं करोति अत एव सा अङ्कुशं धारयति। शरमपि धत्ते सा। यः खल्वनया निर्धारितान् नियमान् समुल्लङ्घयितुमिच्छति तमेषा शरव्यीकरोति। पृथिव्यन्तरिक्षद्युलोकेषु त्रिषु लोकेषु व्याप्तस्य रुद्रस्य अन्नवायुवृष्टिरूपास्त्रयो बाणाः भवन्ति। अत एव त्रिपुरसुन्दर्याः बाणाः सन्ति यैः सा संहरति विश्वम्।

अनेन स्पष्टीभवतीदं यत् षोडश्याः शरीरकान्तिः प्रातःकालिकबालसूर्य-स्येवास्ति। उदीयमानः सूर्यः रक्तवर्णो भवति। तदीयरक्तिमकिरणैः निखिलं जगदपि रक्तवर्णमवलोक्यते। अस्तं गच्छन्नपि सूर्यः रक्तवर्णतामाप्नोति किन्त्विदानीं नासौ तथा प्रखरकिरणो भवति। एतेन स्पष्टमिदं यत्साधकोऽपि सर्वथारुणाङ्गो भवतीति।

उपासनया उपासकः उपास्यामिष्टदेवतां प्रसाध्य प्रसाद्य च तदनुग्रहमासाद्य परमपुमर्थमपवर्गपदवाच्यतामवश्यं लभते। अत एव भारतीयदर्शनस्य भक्तिमार्गेऽस्मिन् उपासनापद्धतौ वा कर्मवादः न लभते स्थानम्। यत्र प्रारब्धकर्मणां भोगादेव क्षयः सञ्चितसञ्चीयमानकर्मणोः ज्ञानाग्निना दाहः प्रतिश्रुतोऽस्ति। श्रीदेव्याः सत्ता सर्वथानिर्वचनीयावश्यं प्रत्येकं भारतीयैः अभ्युपगम्यते। भवतु वा नामान्तरं तस्याः शक्तिः शिवः विष्णुः गणपत्यादिर्वा। यतोहि —

"या यस्याभिमता पुंसः सा हि तस्येष्टदेवता।" इति पुराणप्रथिता उक्तिरस्ति। अत एव श्रीविद्यापि तादृशी एव परमसत्ता इति अभ्युपगन्तव्यम्।

# संस्कृतप्रसारपरिषद्, आरा

## संक्षिप्तम् इतिवृत्तम्

- ❖ स्थापनातिथिः 22.2.1987
- ❖ निबन्धनसंख्या 424/1994-95
- ❖ कार्यालय :- संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (विहारः) 802301 दूरभाषसंख्या - (06182) 24193
- ❖ आरण्यकम् (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)
- ❖ पञ्जीकरणसंख्या - RNI 58951/94
- ❖ संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः) । अथ सम्मानिताः विद्वांसः-

| | | सम्माननवर्षम् |
|---|---|---|
| 1. | पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. | पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. | पण्डित सीताराम उपाध्यायः | 1989 |
| 4. | पण्डित सभानाथ पाठकः | 1990 |
| 5. | पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6. | पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7. | पण्डित केदारनाथ शुक्लः | 1993 |
| 8. | पण्डित जनार्दन मिश्रः | 1994 |
| 9. | पण्डित रामनरेश त्रिपाठी | 1995 |
| 10. | पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. | पण्डित रामप्रवेश त्रिपाठी | 1996 |
| 12. | पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. | पण्डित अम्बिकादत्त त्रिपाठी 'व्यासः' | 1998 |
| 14. | पण्डित डॉ० श्यामानन्द झा | 1999 |
| 15. | पण्डित व्रजभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. | पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |
| 17. | पण्डित जयानन्द मिश्रः | 2001 |

- ❖ प्रकाशितानि - 12 पुस्तकानि (विवरणं शोधपत्रस्य पृष्ठभागे)
- ❖ संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
- ❖ संस्कृतसम्भाषणशिविराणाम् आयोजनम्
- ❖ महाविद्यालय/उच्च-मध्य-प्रायमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
- ❖ वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरःसरं पुरस्कार-प्रमाणपत्रादिवितरणम् ।

❖ संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्रसर्वकारस्य अनुदानेन संस्कृतशिक्षक-प्रशिक्षणवर्ग - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम् ।

❖



# भवभूतिकृतमहावीरचरितस्य नाटकीयवैशिष्ट्यम्

शोभा कुमारी

डा० श्यामानन्द झा

महाकविना भवभूतिना विरचितानि महावीरचरितम्, उत्तररामचरितं मालतीमाधवञ्चेति त्रीणि नाटकानि प्रसिद्धानि सन्ति। एषु नाटकेषु महावीरचरितस्य स्थानमपि न कस्मादपि नाटकात् न्यूनमिति पक्षमुद्घाटयितुं मया महावीरचरितस्य नाटकीयवैशिष्ट्यं यथामति विविधैः प्रमाणैः प्रस्तूयते।

देवतानामृषीणाञ्च राज्ञामथ कुटुम्बिनाम् ।
कृतानुकरणे लोके नाट्यमित्यभिधीयते ।।

इति नाटयशास्त्रवचनेन स्पष्टं यत् नाट्ये लोकवृत्तानुकरणेन लोकाराधनपन्थाः प्रशस्यो भवति। एतदेवाभिलक्ष्य विविधशास्त्रेषु लब्धवैदुष्येण विश्वविश्रुतेन नाटककारेण भवभूतिना पौराणिकमिदमाख्यानं महावीरचरितनाटके समुद्धृतम्।

आदिकविवाल्मीकिरामायणस्य कथानकं 'रामचरितम्' अस्य महावीर-चरितस्य उपजीव्यतामावहति। इदं सप्ताङ्कात्मकं नाटकं महावीरचरितं रामकथाश्रितं मनोरमं कविकलानैपुण्यं द्योतयति। अत्र नाटके महावीरचरिते नाटकस्य सर्वाणि शास्त्रीयलक्षणानि निर्दिष्टानि प्राप्यन्ते। इदमपि अवधेयं यत् वाल्मीकिरामायणे अन्यस्मिन् वा रामकथाश्रिते नाटके यथा रामस्य चरितं प्रदर्शितमस्ति, ततोऽप्यधिकं विशिष्टतरं प्रतिभाकल्पनाप्रसूतं यथास्थलं परिवर्तितं परिशोधितञ्च रामचरितमिदमेतस्मिन् नाटके '.तीयते। उत्तररामचरिते रामस्य

चरितं वर्णयता महाकविना लोकाराधनदृष्ट्या सीतायाः परित्यागोऽपि रामस्य कृते न शोककरः। यथा –

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।। उ० रा०।।

इह श्लोके रामस्य लोकाराधनसङ्ग्रहः कीदृशः आसीत् इति स्फुटं ज्ञायते। अस्मिन् नाटके उत्तररामचरिते करुणरसस्य परिपाकः सर्वत्र दृश्यते। अतएव

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः।। उ० रा०।।

परं महावीरचरिते वीररसस्य प्राधान्यं सर्वत्र विलोक्यते। अस्मादेव कारणात् अत्र रामः महावीरपदेन प्रशस्यते। रामचरितस्य वर्णनप्रसङ्गे परशुरामस्य चित्रणं भवभूतिदिशा सर्वथा नवीनं कल्पनापोढञ्च प्रतिभाति। मम विचारेण परशुरामस्य चरित्रनिरूपणेनैव रामस्य कथानायकस्य चरितमुज्ज्वलं वीरभावोचितञ्च परिलक्ष्यते। अतः 'राम' इत्यस्य स्थाने 'महावीर' इति पदं प्रयुज्य महाकविना महावीरचरितमिति नाटकस्य नामकरणं सार्थकं व्यधायि।

रामायणस्य प्रख्यातकथाधारितेऽस्मिन् महावीरचरिते यत् किमपि परिवर्त्तनं परिवर्द्धनं वा महाकविना कृतं विलोक्यते तत्तु नाटकस्य सौन्दर्यं नवीनां कल्पनाञ्च बोधयति। अस्मिन् नाटके रामवनगमनप्रसङ्गः मिथिलायामेव समुद्भासितः, किन्तु वाल्मीकिरामायणे अयं प्रसङ्गो वनगमनसन्दर्भे निरूपितो दृश्यते। स च अयोध्यायां कृतो विलोक्यते। वाल्मीकिरामायणे रामस्य वधाय सुग्रीवभ्राता बालिः न प्रषितः परञ्च इह संग्रामे रामवधाय महाबलशालिनः बालेः प्रेषणं भवभूतेः स्वकल्पनाप्रतिभाप्रसूतम्। तथैव 'माल्यवान्' इत्यस्य मन्त्रणा महावीरचरिते भवभूतेः अभिनवा सृष्टिः। इयमेव च मन्त्रणा अस्य समग्रनाटकस्य महावीरचरितस्य प्राणस्वरूपा विद्यते। परशुरामस्य विस्तृतवर्णनमपि काव्यचमत्कारातिशयं द्योतयितुमेव इह सर्वत्र परिलक्ष्यते।

समग्रेऽपि महावीरचरिते कथानायकस्य श्रीरामचन्द्रस्य रावणस्य



वधोपायप्रदर्शने माल्यवतः उक्तयः अतीव समीचीनाः प्रतीयन्ते। रावणेन सह समरे रामस्य कोपप्रतिक्रियां वर्द्धयितुं माल्यवतः कथनं रामस्य कृते सुखकरं मर्यादापूर्णञ्च प्रतिभाति। अतएव ब्रह्मर्षयः अमोघानि आयुधानि रामाय प्रदत्तवन्तः, मङ्गलोपहारीकृतं माहेन्द्रं धनुर्बलमगस्त्यमहर्षिणा अनुप्रेषितम् इत्यपि रामस्य शुभसूचकं चिह्नं लक्ष्यते।

अमोघमस्त्रं क्षत्रस्य ब्राह्मणानामनुग्रहः।
दुरासदं च तत्तेजः क्षत्रं यद्ब्रह्मसंयुतम्।। २:५।।

पुनश्च शूर्पणखां प्रति माल्यवतः कथनप्रसङ्गे इदं कथितमस्ति–

निसर्गेण स धर्मस्य गोप्ता धर्मद्रुहो वयम्।
अर्थ्यो विरोधः शक्तेन जातो नः प्रतियोगिता ।। २:७।।

अत्र च नाटकीयकलावैदग्ध्यदृष्ट्या परशुरामस्य सविधे वार्त्ताहरस्य वृत्तान्तप्रेषणमपि अतीव प्रासङ्गिकं वर्त्तते।

"यः परशुरामस्य युष्माभिर्वार्ताहरः प्रेषितस्तेनैतत्तमालरसविन्यस्ताक्षरं तालीपत्रमुपनीतम्।"

आस्मिनेव सन्दर्भे परममाहेश्वरं लङ्केश्वरं रावणमभिनन्द्य माल्यवतः कथनमतिशयं महत्त्वपूर्णम्–

ब्रह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ।। २:१०।।

इत्यनेन सिद्ध्यति यत् सम्पूर्णनाटकस्य कथानकपरिवर्द्धनाय माल्यवतः कथनं समराङ्गणे रामस्य कोपोद्दीपनं कारयति। परशुरामविषये माल्यवान् कथयति यत्–

"जामदग्न्यस्तावदारण्यकव्रतः। स हत्वाऽपि रामं पुनस्तादृशैव।" एतैर्वाक्यैः ब्रह्मक्षत्रतेजोयुक्तस्य जमदग्निपुत्रस्य परशुरामस्य कोपवर्द्धनं जायते।

रामाश्रितनाटकेषु वाल्मीकिरामायणनिर्दिष्टं कथानकमाश्रित्य केवलं रामस्यैव माहात्म्यं भवभूतिना प्रकटितम्, परमिह नाटके प्रतिनायकस्य रावणस्य

परशुरामसदृशस्य महेश्वरभक्तस्य चर्चया कथानके किमपि मौलिकं परिवर्त्तनं महाकविना कृतं विलोक्यते। सख्यः परशुरामस्य वीरतां वर्णयन्त्यः सन्ति—

"सख्यः—वारंवारं निःक्षत्रीकृतसमस्तजीवलोको निवर्तितविषय-व्यवसायः परशुरामः श्रूयते।" म० च० (द्वितीयः अङ्कः)

महादेवप्रदत्तस्य धनुषः भञ्जकस्य रामस्य कृते परशुरामस्य कोपोद्वेजकं वाक्यं नाटकेऽस्मिन् मौलिकतामादधाति—

"हुम्। अहो, दुरात्मनः क्षत्रियबटोरनात्मज्ञता।" म० च० (द्वि० अङ्कः)

रामद्वारा शिवधनुर्भङ्गेन एतत् सिद्ध्यति यत् भूतभावनस्योद्भावनस्य सर्वेषां प्राणिनां मङ्गलकरस्य शङ्करस्यापि भयं रामस्य नास्ति अथवा महादेवस्य प्रियपुत्रस्कन्ध इव अहमपि शिवस्य शिष्योऽस्मि, एवंभूतस्य ममापि स्मरणं केन रामेण न कृतम् ?

स्कन्दः स्कन्द इव प्रियोऽहमथवा शिष्यः कथं न स्मृतः ।।२:२६।।

रामस्य परिचारकं पृच्छन् परशुरामः कथयति यत् दाशरथिः रामः कुत्र वर्त्तते ? जात्या विशुद्धसत्त्वस्य तस्य रामस्य प्रमथनाय अन्विष्यतः मम परशुरामस्य वीर्यगर्वात् आत्मानं गन्धद्विपेन्द्रकलभः यथा आत्मानमर्पयति तथा त्वं (रामः) अर्पयसि। अत्र श्लोके—

अन्विष्यतः प्रमथनाय ममापि दर्पा-
दात्मानमर्पयसि जातिविशुद्धसत्त्वः।
गन्धद्विपेन्द्रकलभः करिकुम्भकूट-
कुटाकपाणिकुलिशस्य यथा मृगारे ।।२:३१।।

उपमया सिंहकर्तृकं गजविदारणमिव मत्कर्तृकं तव (रामस्य) विदारणमपि आसुभावि इति परशुरामस्य तात्पर्यम्।

अनेनैव प्रकारेण महावीरचरितनाटके परशुरामस्य क्रोधजनिताः अनेका उक्तयः परिस्फुरन्ति। याभिः उक्तिभिः रामस्य कृते परशुरामस्य हृदि द्वेषभावः, क्षत्रियजातिनिर्दलनोपायः इत्यादि यथास्थलं सूच्यते। परशुरामस्य एतादृशप्रसङ्गेन



महावीरचरिते किमपि अद्भुतं मानसिकमौत्सुक्यमाविर्भवति। इयमुत्सुकतैव नाटकीयकथायाः प्रख्यापिका प्रमाणिता भवतीति।

इह नाटके दशरथरामयोः वार्त्तालापप्रसङ्गे मध्यमया मात्रा कैकेय्या नृपदशरथदत्तवरद्वयरूपस्य देयत्वेन प्रतिशृण्वन्तं दशरथं प्रति रामस्य कथनं मार्मिकमिति नाटकस्य चतुर्थाङ्के वर्णितमस्ति —

योऽसौ वरद्वयन्यासस्तं माता मेऽद्य मध्यमा।
यथेष्टं नाथते तात तत्प्रसादार्थिनो वयम्।। ४:४७।।

एकेन वरेण भारतस्य राज्यं द्वितीयेन रामस्य वनगमनमिति दशरथस्य निर्णयमवगत्य सर्वेऽपि अयोध्यावासिनः मन्त्रिप्रभृतयश्च शोकाकुलमानसाः रामवनगमनस्य विरोधं प्रकटयन्ति, परं रामः दृढ़प्रतिज्ञो विलोक्यते। अतएव दशरथः किंकर्त्तव्यविमूढ़ः सन्नपि रामस्य वनगमनाय कृतनिश्चयो विद्यते। रघुकुलमर्यादापालनमत्यावश्यकमिति मत्वा रघुवंशजाः यथार्थप्रतिज्ञाः संशयं न कुर्वन्ति—

सत्यसन्धा हि रघवः किं वत्स विचिकित्ससि ?
त्वयि दूतेऽपि कस्तस्याः प्राणानपि धनायति।।४:४२।।

रामस्यापि मातुर्वचनपालनं तत्कुलमर्यादानुसारेण सर्वथा समीचीनमेव परिलक्ष्यते—

सत्यसन्धाः स्थ यदि वा रामो वा यदि वः प्रियः।
तत्प्रसीदत मे माता पूर्णकामास्तु मध्यमा।। ४:५०।।

एतेन प्रकारेण रामवनगमनस्यायं प्रसङ्गो मिथिलायामेवेति भवभूतेः कल्पनावैदग्ध्यम्। अतः इदमपि एकं नाटकीयं वैशिष्ट्यम्। द्वितीयञ्च नाटकीयमुत्कर्षं रामरावणेयोर्युद्धे महाबलशालिनः बालेः प्रेषणं वर्त्तते। अन्यत्र रामाश्रितनाटकेषु युद्धप्रसङ्गे रामस्य वधाय रावणस्य सहायकरूपेण बालेः वर्णनं नैव लभ्यते परन्तु अत्र नाटके रावणः रामं हन्तुं बालिं समराङ्गणे प्रेषयतीति सर्वथा भवभूतेः अभिनवा कल्पना कथयितुं शक्यते। अस्मिन्

प्रसङ्गे रामानुजो लक्ष्मणः वीरविक्रमस्य बालेर्विषये रामं प्रति कथयति –

"लक्ष्मणः–आर्य ! आर्य ! दिष्ट्या प्राप्तः स वीरगोष्ठीविनोदप्रदान-प्रियसुहृन्माधवतः ।" (म० च० पञ्चमोऽङ्कः)

निष्कर्षतः समग्रेऽस्मिन् महावीरचरिते नाटके कविशिरोमणेः भवभूतेः कल्पनया नवीनया प्रतिभया च रामस्य लोकनायकत्वं प्रदर्शितमस्ति । अत्र 'महावीर' इति कथनेन रामस्यैव वीरत्वप्रदर्शनं जातमस्ति । अतएव चेह नाटके अन्यरसापेक्षया क्षत्रोचितधर्मपालकस्य मर्यादापुरुषोत्तमस्य रामस्य कृते महवीरेति विशेषणं महाकविना प्रयुक्तं दृश्यते । उत्तररामचरिते तु सीतायाः करुणरसस्य चित्रणम्, परन्तु अत्र वीरोचितभावस्य प्रदर्शनेनैव महावीरस्य रामस्य ख्यातिः सर्वत्र संसारे सञ्जातेति महाकवेः भवभूतेः अस्य नाटकीयकलाकौशलस्य वैशिष्ट्यमिति अलमधिकेन ।



# विश्वविद्यालय अनुदान आयोग (यू.जी.सी.) – संचालिता जे. आर. एफ./नेट (संस्कृत) – परीक्षा कथं लेखनीया ?

तरुणा सिंह

प्रतिवर्षं विश्वविद्यालय-अनुदान-आयोगेन (यू० जी० सी०) जूनमासे तथा च दिसम्बरमासे कनीयशोधछात्रवृत्ति (J. R. F.) इत्यस्य तथा विश्वविद्यालयेषु वा महाविद्यालयेषु वा प्रवक्तृपदस्य पात्रतां (National Eligibility Test 'NET') निर्धारयितुं राष्ट्रस्तरीया एका अर्हताप्रतियोगितापरीक्षा आयोज्यते । अस्याः परीक्षायाः उद्देश्यं विश्वविद्यालयेषु शिक्षयितुम् उत्कृष्टप्रतिभायाः अन्वेषणम् । एनां परीक्षां लेखितुं परीक्षार्थिभिः सम्बद्धविषये स्नातकोत्तरपरीक्षायाम् ५५% अङ्कैः उत्तीर्णैः भवितव्यम् । ये परीक्षार्थिनः स्नातकोत्तरे अध्ययनशीलाः सन्ति अथवा येषां परीक्षाफलं न घोषितं तेऽपि एनां परीक्षां लेखितुं शक्नुवन्ति । तेषां परीक्षाफले घोषिते सत्यपि अन्यूनं 55% अङ्कानां प्राप्तपत्रं यदि ते दर्शयन्ति तर्हि तत् परीक्षाफलं तेभ्यः दीयते । यत्र श्रेणीव्यवस्था अस्ति तत्र B+ परीक्षाफलम् अपेक्ष्यते । अस्यां पात्रतायां परीक्षायां अर्थात् 'नेट' इत्यस्य कृते काचित् आयुःसीमा निर्धारिता नास्ति परञ्च 'जे. आर. एफ.' इत्यस्य पुरुषाणां कृते २८ (वर्षाणि) तथा च महिलानां कृते ३३ (वर्षाणि) आयुः निश्चितमस्ति ।

अस्यां परीक्षायाम् उत्तीर्णतां प्राप्तुं त्रीणि पत्राणि लेखितव्यानि भवन्ति । एकस्मिन् एव दिवसे पत्रत्रयस्य परीक्षा भवति । प्रथमपत्रस्य कृते सपाद ($1\frac{1}{4}$) घण्टा, द्वितीयपत्रस्य कृते सपाद ($1\frac{1}{4}$) घण्टा, तृतीयपत्रस्य कृते सार्धद्वि-

घण्टा ($2\frac{1}{2}$) परीक्षाकालः भवति। प्रथमपत्रे च द्वितीयपत्रे च प्रतिपत्रं शताङ्कानां 50 वस्तुनिष्ठाः बहुविकल्पिनः प्रश्नाः भवन्ति। वस्तुतः पात्रतां प्राप्तुम् एतयोः परीक्षयोः महत्त्वम् अत्यधिकं न भवति । अत्र केवलं सामान्यज्ञानस्य परीक्षणं भवति। परञ्च तृतीयपत्रं परिशीलयितुं एतयोः पत्रयोः उत्तीर्णता अपेक्षिताऽस्ति। निष्कर्षः यत् एतेनाधारेण एव यू० जी० सी० परीक्षायाम् उत्तीर्णता लभ्यते । अतः त्रिषु पत्रेषु समानरीत्या सिद्धता भवेत् परञ्च तृतीयपत्रस्य सिद्धतायाम् अस्माकं प्रामुख्येणावधानं भवेत् । यतो हि यदा आरभ्य तृतीयपत्रस्य पाठ्यक्रमः परिवर्तितः तदा आरभ्य सर्वत्र एकः एव प्रसङ्गः श्रूयते—'तृतीयपत्रम् अत्यन्तं क्लिष्टं जातम्।' पुस्तकापणेषु अपि नूतनपाठ्यक्रमानुसारेण मार्गदर्शनयुक्तानां पुस्तकानामभावोऽस्ति। परिणामतः एतस्मिन् सन्दर्भे छात्राणां बौद्धिकस्थितिः भ्रान्ता अस्ति। एतत् काठिन्यं विचिन्त्य एतस्यां परीक्षायां सारल्येन तथा च गाम्भीर्येण उत्तरलेखनप्रसङ्गे कश्चित् विमर्शः अत्र क्रियमाणोऽस्ति। कथं परीक्षार्थिनः परीक्षायाः सिद्धताम् अल्पसमये सरलतया, सहजतया, अर्थपूर्णसन्निवेशेन गम्भीरतया योजनाबद्धेन रूपेण च कुर्युः इति। अतः महत्त्वपूर्णं तथ्यं यत् कथं केन माध्यमेन तथा च किम् अवलम्ब्य अस्माभिः साफल्यं प्राप्तुं शक्यते ? अत्र तमेव विषयमवलम्ब्य त्रयाणां पत्राणां परीक्षाप्रस्तुत्युपायाः विविच्यन्ते।

## प्रथमं पत्रम्

अस्य पत्रस्य सिद्धतायाः कृते किञ्चित् विशेषमार्गदर्शनयुक्तं पुस्तकं न दृश्यते परञ्च उपकारप्रकाशनस्य मिथिलेशपाण्डयेन प्रणीतं 'यू. जी. सी.-सी. एस. आई. आर.' पुस्तकं साहाय्यकरमस्ति तथा च 'BANK-P. O.' इत्यस्य सिद्धतायां गणितीयम्, समयसम्बन्धः, बौद्धिकसांख्यिकी, ग्राफसारिणी, धनचौसरः, वेनाकृतिः, चार्टसम्बन्धः तार्किककथनम्, शिक्षण-शिक्षणाभिरुचिः, दिशाज्ञानम्, बोधशक्तिः तथा च निगमनागमनयोः तर्कयोः भेदाः इत्यादिभिः सम्बद्धाः प्रश्नाः पृच्छ्यन्ते। अस्य पत्रस्य परीक्षणस्य उद्देश्यमस्ति प्रत्येकं परीक्षार्थिनः शिक्षणं तथा च शोधाभियोगितायाः मूल्याङ्कनम्।

## द्वितीयं पत्रम्

संस्कृतसाहित्यतः द्वितीयपत्रे बहु-विकल्पिनः ५० प्रश्नाः भवन्ति।



एते प्रश्नाः वैदिकसाहित्यतः १३, दर्शनतः १२, व्याकरणतः ८, भाषाविज्ञानतः ४, संस्कृतसाहित्यतः ७ एवञ्च काव्यशास्त्रतः ७ (आहत्य ५०) प्रश्नाः क्रमशः पृच्छ्यन्ते। एते प्रश्नाः परीक्षायां वस्तुनिष्ठरूपेण भवन्ति। अत्र चत्वारः विकल्पाः भवन्ति। अतः उत्तरलेखने अवधातव्यं यत् तेषु एक एव विकल्पः उत्तरं भवति, अन्ये त्रयः विकल्पाः आंशिकमात्रेणोत्तरेण सम्बद्धाः भवन्ति। प्रश्नानां ज्ञानार्थमेकं प्रारूपं पश्याम :—

एतेषु सर्वाधिकः प्राचीनः वेदः अस्ति—

(क) सामवेदः (ख) अथर्ववेदः

(ग) यजुर्वेदः (घ) ऋग्वेदः * उत्तरम्—(घ)

वस्तुतः द्वितीयपत्रस्य सिद्धतायाः कृते बहुक्लेशः न भवति यतो हि आपणेषु अपि कानिचन मार्गदर्शनयुक्तानि पुस्तकानि दृश्यन्ते। तेषु एते पुस्तके विशेषमहत्त्वं परीक्षार्थिनां कृते सूच्येते (१) भारती प्रकाशन, पटनातः डा० गोपबन्धु मिश्रेण प्रणीतं (Bharati Lectureship Eligibility Test Sanskrit-II) पुस्तकं तथा च उपकार प्रकाशनस्य डा० मिथिलेशपाण्डेयेन प्रणीतं (U. G. C. J. R. F. & Lectureship Examination) पुस्तकम्। पुस्तकद्वये अस्य पत्रस्य विषयाः क्रमशः विमृष्टाः सन्ति तथा च प्रश्नानां प्रारूपमपि सम्यक्तया समुपस्थापितमस्ति।

बहवः प्रश्नाः उत्तरैः सह समाहिताः सन्ति।

## तृतीयं पत्रम्

अस्य पत्रस्य मूल्याङ्कनमाश्रित्यैव जे० आर० एफ० उत प्रवक्तृपदस्य पात्रता प्राप्यते। अस्य पत्रस्य पाठ्यक्रमे खण्डद्वयमस्ति—खण्डः 'A' तथा च खण्डः 'B'। 'A' खण्डे दश उपखण्डाः (इकाई) सन्ति। प्रत्येकस्मात् उपखण्डात् प्रश्नद्वयं पृच्छ्यते ययोः एकस्यैव उत्तरं ३०० शब्दैः १२ निमेषैः (मिनट) लेखनीयम्। इत्थं लघुनिबन्धप्रकारस्य दश प्रश्ना अभवन्। एते प्रत्येकं प्रश्नः १६ अङ्कानां भवति। आहत्य 'A' खण्डः (१६×१०) १६० अङ्कानां भवति। यदि अस्य खण्डस्य पाठ्यांशान् क्रमशः पश्यामः तर्हि व्यापकस्याध्ययनस्य आवश्यकता अनुभूयते। यतो हि सर्वेऽपि विषयाः परीक्षायाः कृते अनिवार्याः सन्ति तथा च प्रत्येकस्मात् उपखण्डात् एकः प्रश्नः नूनमेव लेखनीयः भवति।

अतः व्यापके पाठ्यक्रमे सति परीक्षार्थिनां चिन्तनं भवेत् अल्पसमये कथं कीदृशी सिद्धता भवेत् ? अस्मिन् विविधैः परीक्षार्थिभिः सह विमर्शेन विकल्पद्वयमुपस्थाप्यते ·

सामान्यतः प्रत्येकम् उपखण्डं (इकाईगतानां) पुस्तकानां सामान्यं ज्ञानं भवेत् तथा च स्वलेखनकौशलम्। तेन परीक्षायाम् उत्तरलेखने सारल्यं वैशिष्ट्यं च सम्भाव्यते।

यदि पाठ्यक्रमं पश्यामः तर्हि प्रत्येकस्मिन् उपखण्डे त्रीणि, चत्वारि, पञ्च ततोऽप्यधिकानि वा पुस्तकानि पठितव्यानि सन्ति। सहजतया समयाभावे पुस्तकभारः प्रतीयते। अतः सामान्यं ज्ञानं सर्वेषां पुस्तकानां भवेत्-परञ्च यस्मिन् उपखण्डे त्रीणि पुस्तकानि सन्ति तत्र पुस्तकद्वयस्य गम्भीरज्ञानं भवेत् येन तेभ्यः पुस्तकेभ्यः प्रश्नद्वये पृष्टे सति एकस्य उत्तरं सरलतया लेखितुं क्षमता अस्माकं पार्श्वे भवेत्।

'B' खण्डः अस्माकम् ऐच्छिकस्य विषयस्य पत्रमुच्यते। यत्र वेदः, व्याकरणम्, दर्शनम्, साहित्यं तथा च पुरा लिपिः इति पञ्च विषयाः भवन्ति। एतेषु विषयेषु एकः ऐच्छिकः विषयः स्वीकरणीयो भवति यस्मात् ४० अङ्कानां प्रश्नस्योत्तरं ३० निमेषैः लेखनीयः। आहत्य तृतीयपत्रं (खण्डः A खण्डः B च) द्विशताङ्कानाम् (२००) अभवत्। एषः अपि 'B' खण्डः प्रमुख : एव परञ्च स एव क्लेशः। अतः अस्य पत्रस्यापि सिद्धतायाः कृते केचन विकल्पाः उपस्थाप्यन्ते–

- सः विषयः ऐच्छिकरूपेण चेतव्यः यस्मिन् स्नातकोत्तरे अस्माकम् अत्यधिका रुचिः तथा च नियन्त्रणं भवेत्।
- समयस्य महत्त्वं तथा च अधिकम् अङ्कलाभं विचिन्त्य एव विषयः चेतव्यः।
- केषांचन परीक्षार्थिनाम् अनुभवः यत् अन्येषां विषयाणाम् अपेक्षया व्याकरणं सरलं प्रतीयते। यतो हि पाठ्यक्रमस्य केचन व्याकरणांशाः वयं स्नातकोत्तरे एव पठन्तः भवामः तथा च अत्र पठितुम् अतिरिक्तं 'वाक्यपदीयम् तथा च पाणिनीयशिक्षा' इति पुस्तकद्वयमस्ति वाक्यपदीयात् गतद्विवारतः प्रश्नः पृष्टः आसीत्। परञ्च अस्यार्थः तथा न यत् अग्रेऽपि एतस्मात्



पुस्तकात् एव प्रश्नाः भवितुमर्हन्ति। अतः सिद्धता सर्वस्मिन् प्रसङ्गे भवेत्।

- छात्रैः विषयान् अवलम्ब्य सामूहिकपरिचर्चा करणीया तथा च रणनीतिः सर्वथा मानसिक-आर्थिक-परिस्थित्यनुसारेण एव निर्मातव्या। अर्थात् अन्तिमनिर्णयः परीक्षार्थिनां स्वकीयः भवेत्।

इतोऽपि भवतां साहाय्यार्थं नूतनपाठ्यक्रमानुसारेण स्मृत्याधारेण गत दिसम्बर २००१ परीक्षायाः प्रश्नाः उपस्थाप्यन्ते–

## तृतीयं पत्रम् खण्डः 'A'

1. ☆ पृथ्वीसूक्तस्य महत्त्वं विविच्यताम्।
   ☆ शुनःशेपस्य आख्यानं प्रतिपाद्यताम्।
2. ☆ महाभाष्यानुसारेण व्याकरणाध्ययनस्य प्रयोजनम् उल्लिख्यताम्।
   ☆ भारोपीय परिवारस्य संक्षिप्तपरिचयं लिख्यताम्।
3. ☆ सांख्यमतानुसारेण सत्कार्यवादः विविच्यताम्।
   ☆ प्रयोगविध्यनुसारेण समाविष्टषड्विधलिङ्गानां विवरणं क्रियताम्।
4. ☆ कठोपनिषदनुसारेण आत्मस्वरूपस्य वर्णनं क्रियताम्।
   ☆ तैत्तिरीयोपनिषदनुसारेण ब्रह्मविद्यां प्रतिपाद्यताम्।
5. ☆ यास्कमतानुसारेण षड् भावविकारान् विविच्यताम्।
   ☆ एतेषां पदानां निर्वचनं क्रियताम् –
   अग्निः, गौः, आदित्यः, उदकः
6. ☆ पीलुवाक्वाचीपिठरवादवाच्योः भेदः विविच्यताम्।
   ☆ तर्कभाषानुसारेण प्रत्यक्षप्रमाणं सभेदं निरूप्यताम्।
7. ☆ विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः विविच्यताम्।
   ☆ कयोश्चिद् द्वयोः टिप्पणी लेखनीया–
   (क) भवन्ति नम्रास्तरवः
   (ख) विरम विरम वह (ग) धर्मो हि
8. ☆ रामायणकालीनसमाजः विविच्यताम्।
   ☆ महाभारतस्य साहित्यिकं महत्त्वं विविच्यताम्।

9. ☆ मनुस्मृत्याधारेण राजधर्मः निरूपणीयः ।
☆ अर्थशास्त्रानुसारेण विवाहसम्बन्धः प्रतिपादनीयः ।

10. ☆ ध्वनिविरोधिमतं सभेदं निरूप्यताम् ।
☆ कयोश्चिद् द्वयोः व्याख्या लेखनीया–
(क) तं सन्तं श्रोतुमर्हन्ति
(ख) स किंसखा साधु न शास्ति
(ग) युगान्तकालप्रतिसंहृतात्मने
(घ) स्मरोपतप्तोऽपि भृशं न प्रभुः ।

## तृतीयं पत्रम् खण्डः 'B'

1. राष्ट्राभिवर्द्धनसूक्तस्य महत्त्वं प्रतिपाद्यताम् ।
2. ध्वनिस्फोटयोः सम्बन्धः निरूपणीयः ।
3. राजशेखरानुसारेण काव्यहेतवः निरूपणीयाः ।
4. अथाऽतो ब्रह्मजिज्ञासासूत्रं निरूपणीयम् ।
5. अशोकस्य अभिलेखाः सोदाहरणं लेखनीयाः ।
6. 'सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा' इति निरूपणीयः ।

एतावत् पर्यन्तं परीक्षायाः सिद्धतायाः कृते त्रयाणां पत्राणां पृथक्-पृथक् विषयाः विमृष्टाः परञ्च केचन विषयाः तादृशाः भवन्ति ये त्रयाणामपि पत्राणां कृते समानरीत्या उपयुक्ताः भवन्ति । ते च एवं सन्ति–

**अवधातव्यः विषयः** – एषा परीक्षा मौखिकी नास्ति अपितु लिखिता अस्ति । अतः सिद्धता अपि अस्माकं तथैव भवेत् । अर्थात् लिखितविषयः सुस्पष्टः शुद्धः तथा च गाम्भीर्ययुक्तः स्यात् ।

**स्मर्तव्यः विषयः** – परीक्षायां याः भाषाः अर्हताप्राप्ताः सन्ति तासु कयाचित् अपि भाषया उत्तराणि लेखितुं शक्यते । परञ्च स्मर्तव्यं यत् यस्यां भाषायां प्रश्नानाम् उत्तरं लिखामः तस्यां भाषायां सम्यक् नियन्त्रणं भवेत् । यथा संस्कृतेन यदि उत्तरं लेखनीयम् तर्हि उत्तरपुस्तिकायाम् उत्तरस्य भाषा शुद्धा, सरला तथा च सुस्पष्टा भवेत् ।



**विवेचितव्यः विषयः** – परीक्षार्थिभिः परस्परं सर्वदा विषयाः विवेचनीयाः । तस्मात् विषयेषु नियन्त्रणं तथा च सुस्पष्टता भवति । बहुविकल्पिनः प्रश्नाः तथा च लघुनिबन्धस्तरीयाः प्रश्नाः अपि विमर्शनीयाः ।

**लेखितव्यः विषयः** – परीक्षायां लघुनिबन्धप्रकारः, व्याख्या, निर्वचनं तथा च दीर्घनिबन्धयुक्ताः प्रश्नाः भवन्ति । अतः अवधातव्यं यत् प्रश्नानां प्रारूपानुगुणेन सीमितसमये, सीमितशब्दैः एव लेखनस्य वारंवारम् अभ्यासः, परिष्कारः तथा च संशोधनम् अपेक्ष्यते । यतो हि एतानि तथ्यानि एव अङ्कप्राप्तेः प्रमुखहेतवः सन्ति ।

वस्तुतः अत्र परीक्षार्थिनां साहाय्यार्थं काञ्चन विषयान् उपस्थापयितुं प्रयत्नाः कृताः परञ्च एतेऽपि विषयाः पर्याप्ताः न इति चिन्तयामि । तथापि आशासे यत् अत्र उपस्थापिताः विषयाः परीक्षार्थिनां कृते सहायकाः भविष्यन्तीति । अग्रेऽपि यदि विषयाः स्फुरन्ति तर्हि विमर्शं कुर्मः ।

❖

## किंचित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते ।

1. **साम** — सामानि वाक्यविशेषस्था गीतय उच्यन्ते ।
   — अ० यज्ञकर्मण्यजपन्यूङ्खसामसु १.२.३४

2. **समानाधिकरणः** — (अधिकरणशब्दोऽभिधेयवाची)
   समानाधिकरणः समानाभिधेयः
   — अ० तत्पुरुषः समानाधिकरणः कर्मधारयः १.२.४२

3. **अर्थवत्** — अभिधेयवचनोऽर्थशब्दः
   — अ० अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १.२.४५

4. **व्यक्तिः** — व्यक्तिः स्त्रीपुंनपुंसकानि
   — अ० लुपि युक्तवद् व्यक्तिवचने १.२.५१

5. **वचनम्** — वचनम् एकत्वद्वित्वबहुत्वानि
   — अ०१.२.५१

6. **कालः (अद्यतनः)** — इहान्ये वैयाकरणाः कालापसर्ज्जनयोः परिभाषां कुर्वन्ति—'आन्याय्याद् उत्थानाद् आन्याय्याच्च संवेशनात्' एषोद्यतनः कालः
   अपरे पुनराहुः—'अहरुभयतोर्द्धरात्रशेषोऽद्यतनः कालः' इति
   — अ० कालोपसर्ज्जने च तुल्यम् १.२.५७

7. **उपसर्ज्जनम्** — तथोपसर्ज्जनपरिभाषां कुर्वन्ति—
   'अप्रधानमुपसर्ज्जनम् इति'
   — अ०१.२.५७

8. **वृद्धः** — वृद्धशब्दः पूर्वाचार्यसंज्ञा गोत्रस्य
   अ० वृद्धो यूना तल्लक्षणश्चेदेव विशेषः १.२.६५

(क्रमशः)



# संस्कृतसौरभसञ्चयनम्

(अप्रकाशितसंस्कृतकाव्यनाटकादीनां संग्रहः प्रकाशनं च)

संस्कृतप्रसारपरिषच्छोधपत्रस्य 'आरण्यक' स्य परिशिष्टम्

## चतुर्थं पुष्पम्

# ध्रुवचरितम्

प्रणेता

पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

सम्पादकः

डा० गोपबन्धु मिश्रः

❑ संस्कृतसौरभसञ्चयनम्

❑ चतुर्थं पुष्पम्

❑ ध्रुवचरितम्
(गद्यनिबद्धम्)

❑ प्रणेता
पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

❑ सम्पादकः
डा० गोपबन्धु मिश्रः

❑ प्रकाशिका
संस्कृतप्रसारपरिषद्
मारुतिमन्दिरम्, प्रकाशपुरी
आरा (विहारः)

❑ मुद्रकः
आरा प्रिन्टर्स
गोला महल्ला (निकट जैन स्कूल), आरा

# पुरोवाक्

पण्डित व्रजभूषण मिश्र 'आक्रान्त' महोदयेन विरचितं 'ध्रुवचरितं' प्रकाश्य संस्कृतप्रसारपरिषदियं प्रसन्नतामनुभवति। यद्यपि आक्रान्तमहोदयः एव अस्याः परिषदः संस्थापकोऽध्यक्षः आरण्यकस्य प्रधानसम्पादकश्चासीत् परन्तु तस्य जीवनकाले एषः ग्रन्थः प्राकाश्यं नायातः इति सविषादं सूचयामः। सद्यः ३० मार्च, २००२ दिनाङ्के सायं सप्तवादने माननीयः आक्रान्तमहाभागः शोकाकुलान् अस्मान् परित्यज्य महाप्रयाणं कृतवान् इति विधिवशात् सूचयितुं विवशाः वयम्। जीवनस्य अन्तिमेषु त्रिषु वर्षेषु एष महाभागः हनुमच्चरितम्, प्रह्लादचरितम्, ध्रुवचरितम्, श्रवणकुमारचरितम्, आत्मचरितम्, चिन्तनानि इति षट् गद्यबद्धाः रचनाः रचितवान् आसीत्। स्वजीवनकाले 'हनुमच्चरितम्' इति ग्रन्थस्य प्रकाशनं प्रारब्धमपि पूर्णतां नागात्। इदानीं तत् स्वतन्त्रापुस्तकरूपेण प्रकाश्यमानमस्ति। 'ध्रुवचरितम्' इदं आरण्यकमुखेन देशस्य विविधं स्थानमाप्नुयादिति अभिलक्ष्य परिशिष्टरूपेणात्र प्रकाश्यते।

'ध्रुवचरितम्' इदं श्रीमद्भागवतप्रथितस्य भक्तबालकस्य ध्रुवस्य चरितमश्रित्य विरचितमस्ति। एषः स एव ध्रुवः यः केवलं पञ्चवर्षीयो भूत्वाऽपि कठोरेण तपसा भगवतः विष्णोः साक्षाद्दर्शनं कृतवान्, विष्णोराशीर्वादेन सुखेन महीं भुञ्जानः अन्ते सर्वेषु ग्रहेषु नक्षत्रेषु सप्तर्षिषु देवेषु चोच्चतमं स्थानं प्राप्तवान्। सप्तर्षयः तस्य परिक्रमां कुर्वन्तः सन्ति, आकाशे उत्तरदिशायाम् अविचलं स्थित्वा इदानीमपि ध्रुवनक्षत्रं ध्यानमग्नो भक्त इव जनमनांसि आकर्षति। अतीव सरलभाषया भक्तस्य एतस्य बालस्य चरितं वर्णयता आक्रान्तमहाभागेन तस्य पितुः उत्तानपादस्य, मातुः सुनीतेः, विमातुः सुरुचेः, देवर्षेः नारदस्य इत्येवमपि अपरेषां चरितानि अपि स्फुटीकृतानि। ध्रुवस्य अविचलं तपः, विचारे दृढता, ध्येयवादिता च रचयितुः जीवने महान्तं प्रभावं पातयन्तः सन्ति इति प्रतीयते। अपरेषां समेषामपि जीवनम् एतादृशैः आदर्शस्वभावैः उत्प्रेरितं स्यादिति एतदर्थम् एषा रचना रचितेति रचयितुः लेखनशैल्या सम्यग् अनुभूयते। भारतीयमनीषिषु न केवलं वयोवृद्धाः तपस्विनः एव महाजनाः, अपि तु तपोनिष्ठाः भक्ता बाला अपि प्रणम्या इति उत्तमसन्देशस्य संवाहकमिदं

चरितं 'युक्तियुक्तं वचो ग्राह्यं बालादपि शुकादपि', 'न धर्मवृद्धेषु वयः समीक्ष्यते' (कालिदासस्य) इत्यादि सुभाषितं सार्थकीकुर्वत् अस्ति। रचयितुः अन्यान्यपि चरितानि तथैव आकषकाणीति अत्र संक्षेपेण वक्तुमुत्सहामहे।

संस्कृतप्रसारपरिषदः शोधपत्रे 'आरण्यके' ऽस्मिन् 'संस्कृतसौरभ-सञ्चयनम्' इत्याख्यया योजनया अप्रकाशितानां संस्कृतकाव्यनाटकदर्शनादि-ग्रन्थानां सम्पादनपुरःसरं प्रकाशनमुद्दिष्टमस्ति। प्रकाश्यमाना ग्रन्था अत्र 'पुष्प' रूपेण आख्यायन्ते, तेषां सौरभं सर्वत्र सञ्चरेदिति लक्ष्यत्वात्। अस्यां योजनायाम् एतानि पुष्पाणि (ग्रन्थाः) प्रकाशितानि सन्ति–

| पुष्पम् | ग्रन्थः | रचयिता |
|---|---|---|
| प्रथमम् | सुदामचरितम् | पं० बहोर पाठकः |
| द्वितीयम् | उपेन्द्रविज्ञानदर्शनम् | पं० उपेन्द्रदत्त शर्मा |
| तृतीयम् | भावनाविलासशतकम् | ,, |

इदानीं 'ध्रुवचरितम्' इदं चतुर्थपुष्परूपेण प्रकाश्यमानमस्ति। शोधपत्रे प्रकाशनात् अनन्तरम् अस्य ग्रन्थस्य पुस्तकरूपेण स्वतन्त्रं प्रकाशनं विधास्यते।

एतेन प्रकाशनेन संस्कृतसाहित्यश्रीः संवर्धिता स्यात्, तस्याः शोभया संस्कृतसाहित्यसमुपासकानां सहृदयानां चेतांसि प्रफुल्लितानि स्युरिति आकाङ्क्ष्य विरम्यते।

**गोपबन्धु मिश्रः**
सम्पादकः

# ध्रुवचरितम्

स्रष्टुः प्रयत्नेन सृष्टिरभवत्। चराचरप्राणिभिः सह मानवसृष्टिरपि जाता। सर्वेषां प्राणिनां विशषतो मानवानां नियन्त्रितजीवनाय प्रशासनस्य व्यवस्था निर्मिता। शासकशासितयोर्भेदोऽभवत्। राज्ञः प्रजानां च विभाजनं जातम्। सर्वप्रथमं स्वयम्भुवमनुर्नाम नृपतिरभवत्। तस्य राज्ञः शतरूपा नाम्नी धर्मपत्न्यासीत्। तयोर्दम्पत्योः प्रियव्रतोत्तानपादौ द्वौ पुत्रौ प्रादुर्भूतौ। तयोरुत्तानपादो नीतिनिपुणो धर्मपरायणस्तपोनिष्ठश्चाभवत्। अतो भूपतिपद-मलङ्कृतवान्। जन्मकाले तस्य पादौ विशेषरूपेणोत्तानावास्ताम्। अत एव तस्य जननी शतरूपा तमुत्तानपाद इति कथयति स्म। स चिरं शीर्षासनेन पादावुपरिकृत्य तपस्तप्तवान्। अत एवाऽपि स उत्तानपादनाम्ना प्रसिद्धोऽभवत्। तस्य राज्ञः सुरुचिः सुनीतिश्च द्वे पतिपरायणे धर्मपत्न्यावास्ताम्।

तस्य धर्मात्मनो राज्ये जीवानामङ्गुलिषु वैषम्यम्, मानवानां हृत्सु ज्ञानस्य बुभुक्षा, मानवेषु वेदशास्त्रादीनामर्थस्य कृते लोलुपता, पापात् भीतिः, नारीणां केशपाशेषु कुटिलता, सर्पाणां गतिषु वक्रता, दीपशिखासु प्रकम्पनम्, फलानामधःपतनम्, नदीनां जलप्रवाहेषूद्विग्नता, काकानां स्वरेषु कर्कशता, अनले तापः, यतीनां हस्तेषु दण्डम्, नर्तकानां नृत्येषु विभेदः, यदा-कदा सूर्यचन्द्रयोः कलङ्कः, विवाहेषु पाणिग्रहणम्, पाषाणखण्डेषु कठोरता, कामक्रोधादिशत्रुभिः सह सङ्घर्षः नान्यत्र।

तस्य धर्मात्मनः शासनकाले मठेषु वेदघोषः, मन्दिरेषु घण्टानादः, शङ्खध्वनिः, हरिहरकथा च, विद्यालयेषु विद्याविनोदः, विदुषां गोष्ठीषु शास्त्रार्थ-विलासः, कविगोष्ठीसु कवितापाठः, लोकभाषाभिः सह संस्कृतभाषायाः सम्यक् प्रसारः, मातृ-पितृ-गुरूणां सम्यक् समादरः, नगरेषु ग्रामेषु च सर्वत्र स्वच्छतायाः साम्राज्यम्। न केवलमित्येवाऽपितु जलदानां यथासमयं यथेष्टजलवर्षणम्। फलतो वृक्षलतावनस्पतीनां सुफलदानम्, क्षेत्रेषु यथेष्टमात्रायां सस्योत्पादनम्,

पवनस्य सदाऽनुकूलं प्रवहनम्, ऋतूनां सर्वेषां सदानुकूल्यम्, वनानां पर्वतानाञ्च सदासमुचितसहयोगदानञ्च भवति स्म। तस्य धर्मात्मनो राज्ये न च कदाचिदुल्कापातः, झञ्झाझङ्कृतोन्मादः, जलप्लावनम्, अशनिनिपातः, भूकम्पनम्, अग्निदाहः, अकालमरणम्, चौर्यचर्चा, दस्युदमनीयता, कस्याऽप्यपहरणं श्रूयते।

स राजा यदा-कदा प्रजारञ्जनार्थं स्वशासनक्षेत्रस्य नगरेषु ग्रामेषु च परिभ्रम्य प्रजाजनस्य काठिन्यमनुभवति। तद्दूरीकरणाय केवलमाश्वासनं न ददाति, तत्कालं सक्रियतां प्रदर्शयति। राज्यकर्मचारिषु शैथिल्यं नायादेतदर्थञ्च प्रयत्नवान् भवति। प्रजाः च राजदर्शनं कृत्वा स्वाः धन्याः मन्वते। जयतु उत्तानपादः इत्यस्य नादं कुर्वन्ति।

स राजा बाह्यदृष्ट्याप्यतिमनोहर आसीत्। शिरसि तस्य कुञ्चिताः केशाः, चन्दनचर्चितोन्नतभालः, चापाकृतिचपलौ भ्रुवौ, नीरजयिव नयनाभिरामे नयने, स्मृतिमधुराधरौष्ठौ, चन्द्र इव सम्पूर्णमाननम्, शङ्खसदृशी ग्रीवा, शिलाखण्डसदृशौ सुपुष्टौ स्कन्धौ, सबलौ भुजौ, कदलीस्तम्भाविव सुचिक्कणजघनप्रदेशौ कमलमिव दर्शनीयौ, किन्तु कठोरौ चास्ताम्। स यदा राजपरिधानेन मण्डितो भूत्वा चलति दर्शकानां नायनान्युन्मीलितान्येव तिष्ठन्ति। स च पञ्चत्रिंशद्वर्षदेशीयोऽभवत्। एवं तस्य व्यक्तित्वस्य कृतित्वस्य च चर्चा चलति स्म। वस्तुतः स राज्ञां कृतेऽनुकरणीय आदर्श इवासीत्।

तस्य राजभवनस्याऽन्तःपुरे पूर्वकथिते द्वे धर्मपत्न्यौ सुरुचिः सुनीतिश्चास्ताम्। ते चातिशोभने, सुकुमार्यौ चास्ताम्। ते च परस्परं मिलित्वोपरिष्टात् प्रेम्णा च निवसतः स्म।

सर्वमासीत्, किन्त्वेकपत्नीव्रतं विना राज्ञोऽन्तःपुरस्य जीवनं नातिशोभनमासीत्। राज्ञो मनसि सदाऽन्तर्द्वन्द्वः विराजते स्म। प्रथमायाः पत्न्या यस्या नाम सुरुचिः, तस्या विग्रहो भवति-शोभना रुचिर्यस्याः सा। किन्तु सा स्वभावभङ्गिमया, नारीसुलभवाक्पटुतया मन्मथोद्दीप्तिकारिकया गत्या च राज्ञो मनो विशेषरूपेणाकर्षति स्म। न केवलमाकर्षति स्म, स्वनाम्नो विपरीतं कुरुचिमुत्पादयति स्म। राजानं विशेषरूपेण विषयाऽऽसक्तमपि करोति स्म।

एतद्विपरीतं मुनीतिः– शोभना नीतिर्यस्याः सा राज्ञो मनसि नीतिमुद्घाटयति स्म। राजानं कथयति स्म आवयोर्भवता समान एव स्नेहः करणीयः। विशेषरूपेण कामाऽऽसक्तिः कमपि कर्तव्यविमुखं करोति। 'ऋतौ भार्यामुपेयेते' ति श्रुतिवाक्यं स्मारयति स्म। यद्यपि धर्मपरायणेन राज्ञा सुनीतेर्वचनं स्वीक्रियते, साऽपि नोपेक्ष्यते तथापि स सुरुचेर्विशेषबन्धनान्मुक्तो न भवति स्म।



एवं कालक्रमेण पत्न्यौ सन्तानोत्पत्तिधारकं चिह्नं धृतवत्यौ। यथासमयञ्चैकस्मिन् वर्षे किन्तु पृथक्-पृथक् मासे सुतमेकमेकं जनयामासतुः। राजभवनमानन्देन परिपूर्णं जातम्। अन्तःपुरे नारीवर्गमध्ये विशेषोत्साहो दृष्टः। गीतैः, वाद्यैर्नृत्यैश्चाऽन्तःपुरं मुखरितं जातम्। सुरुचिर्विशेषरूपेण प्रसन्नाऽऽसीत्। यतस्तस्य पुत्रो ज्येष्ठ आसीत्। राज्ञो ज्येष्ठः पुत्र एव राजसिंहासनाऽधिकारी भवति। सुनीतिरपि प्रसन्नाऽऽसीत्। यतस्तस्य सुतो यदोत्पन्नस्तदा प्रसवगृहेऽभूतपूर्वः प्रकाशो जातः। तयाऽनुभूतं यदयं कोऽपि जगत्प्रसिद्धो महापुरुषो भविष्यति।

राजाऽपि परमप्रसन्न आसीत्। मासद्वयस्य मध्ये द्वौ सुतौ प्राप्य को न प्रसन्नो भवति ? पुनर्दैवज्ञेन सुतयोः सौभाग्यमपि वर्णितमासीत्। अतो राजभवनं परित आनन्दोत्सवानामायोजनं स्वाभाविकमेवाऽऽसीत्। धर्मात्मनो राज्ञः धर्मात्मानौ पुत्रौ भविष्यति इति श्रुत्वा प्रजाः प्रसन्नाः आसन्। अतः सम्पूर्णे राज्ये सर्वत्राऽऽनन्दोत्सव आयोजितोऽभवत्।

आनन्दोत्सवेषु प्रीतिभोजानामायोजनन्त्वाकर्षकमजायत। विविधविधानां मिष्टान्नानां व्यवस्था तु देवानामपि ध्यानमाकर्षत्। स्वच्छीकृतेषु स्थानेषूपविश्य सर्वेऽभुञ्जन्।

एवं कालक्रमेण वर्धमानौ सुतौ क्रमशः 'उत्तमः' 'ध्रुव'श्चेति नामभ्यां प्रसिद्धौ जातौ। तौ च क्रोडात् क्रोडान्तरं गच्छन्तौ, विहसन्तावन्तःपुरस्थानां सेविकानां मनस्तु हरन्तावास्तामेव यदा-कदा राज्ञो मनोऽपि हरतः स्म।

कतिपयमासानन्तरं मातुः क्रोडादवतीर्य हस्तपादाभ्यां चलितुमारभताम्। तयोः शरीरे धूलिधूसरिते भवतः स्म। कदाचित्तयोर्लीलां वीक्ष्य माता सुरुचिस्तौ धर्तुं चलति। तदानीन्तु तौ विहसन्तौ द्रुततरौ चलतः स्म। माता सुनीतिरपि तयोर्लीलामवलोक्य मोदते स्म। एवमन्तःपुरस्य प्राङ्गणं तयोर्लीलया मुखरितं जातम्।

एकदा राजाऽन्तःपुरस्य प्राङ्गणं प्राविशत्। आगतं राजानं दृष्ट्वा राज्ञ्यौ मुदिते जाते। स्व-स्वतनयं क्रोडे निधाय राजानं दर्शितवत्यौ। राजा च

तौ दृष्ट्वा परमं मोदं [illegible] तवान्। क्रमशः तौ क्रोडे निधाय चुचुम्ब।

इत्थं बालकौ वर्धमानौ भूत्वा चलितुमारभताम्। कदाचिच्चलितौ कदाचिच्च स्खलितौ भवतः। अन्तःपुरप्राङ्गणं तयोर्लीलयाऽऽनन्दमयं जातम्। यद्यपि मातरौ तयोः शृङ्गारं कृत्वा त्यजतः स्म तथापि तौ त्वरितमेवोत्प्लुत्य कूर्दित्वा भूमौ विलुण्ठ्य च धूलिधूसरितौ भवतः स्म। इत्यस्यामवस्थायामपि मातरौ यदा-कदा पिता च क्रोडे निधाय स्वपरिधानानि दूषितानि कुर्वन्ति। एवं क्रमेण बालकौ चतुर्वर्षीयौ भूत्वा पञ्चमे वर्षे प्राविशताम्।

तयोर्बालकयोर्ध्रुवः किञ्चिद्विलक्षण आसीत्। तस्य बुद्धिः प्रखरतराऽऽसीत्। कमपि विषयं ज्ञातुं स गुरुजनानां वचनं ध्यानेन शृणोति स्म। तस्य स्मरणशक्तिरपि तस्य बुद्धेः प्रखरतां प्रकटयति स्म। वारमेकं श्रुत्वाऽपि कामपि सूक्तिं मुखस्थां करोति। यदा-कदा चैतादृशीं जिज्ञासां प्रकटयति यया माता सुनीतिस्तु चकिता भवति स्मैव, पिताऽपि चकितो भवति स्म। उत्तमोऽपि बुद्धिमानासीत्, किन्तु ध्रुवस्तस्मात् बुद्धिमत्तर आसीत्। द्वौ बाललीलायां निपुणावास्ताम्, किन्तु ध्रुवस्य बाललीलायामलौकिकताऽऽसीत्। उत्तमोऽपि विहस्य गुरुजनानां मनो हरति, किन्तु ध्रुवः स्वस्मित्या कस्याप्यात्मानं स्पृशति। उत्तमेनाऽपि खेलितुं परिवेशिनो बालका वाञ्छन्ति, किन्तु ध्रुवेण सह क्रीडने यदानन्दमनुभवन्ति स आनन्दोऽनिर्वचनीयो भवति। यद्यप्युत्तमं कश्चिन्न तिरस्करोति तथापि ध्रुवस्य मेधसश्चमत्कारं दृष्ट्वा सुरुचिश्चिन्तिताऽऽसीत्। तस्याश्चिन्तायाः कारणमिदमासीद् यद् यद्ययं ध्रुवः स्वबुद्धेः प्रखरतयोत्तमादधिकं वैशिष्ट्यं प्राप्स्यति चेत् प्रजानां समर्थनेन राज्यसिंहासनाऽधिकारी भविष्यति। यतो मम स्वामी स्वाग्रजस्य प्रियव्रतस्याऽनुज एवासीत्, किन्तु स्वचरित्रतेजोभिरयमेव राजाऽभवेत्। तथैव यद्ययं ध्रुव उत्तमादधिकं वैशिष्ट्यं प्राप्य राज्यस्योत्तराधिकारी भविष्यति चेदहं किं करिष्यामि ? अनया चिन्तया साऽहर्निशं व्यग्रा तिष्ठति स्म।

इतः सुनीतिः स्वपुत्रस्य ध्रुवस्य वैलक्षण्यं वीक्ष्य चिन्तिताऽऽसीत्। सा सदैकान्ते विचारयति स्म यदयं मम सुतो वितृष्णोऽस्ति। अस्य मनसि कस्यापि वस्तुनः कृते आसक्तिर्नाऽनुभूता भवति। यदा-कदाऽयं ध्यानमग्नो भूत्वा न जाने किं किं विचारयति ? कदापीत्थं प्रश्नं पृच्छति येनाऽस्य वैराग्यं सूच्यते। वीतरागो भूत्वाऽयं गृहं त्यक्ष्यति किम् ? तदाऽहं पुत्रं विना कथं जीविष्यामि ?



राजा उत्तानपादोऽपि स्वपरिवारस्येमामवस्थां निरीक्ष्य चिन्तयितुं विवशो भवति स्म। विशेषरूपेण सुरुचेर्व्यवहारस्तं व्यथयति स्म। न जाने किं करिष्यतीयम्। उत्तमोऽपि सुशीलः, मेधावी प्रखरबुद्धिस्त्वस्त्येव। अतो युवा भूत्वा यदि युवराजपदं प्राप्स्यति चेन्मम हृदि न किञ्चिद् वैकल्यम्। ध्रुवोऽपि च यादृशो निस्स्पृहः परिलक्ष्यते, तेन विगतस्पृहेण न कापि बाधोत्पत्स्यते। नीतिपरायणा सुनीतिरपि स्वसुतं राज्याय न प्रेरयिष्यति। सा तु सुतं महामानवं कर्तुं वाञ्छति। किन्तु, सुरुचिरियं यदा-कदा कुरुचिं प्रकटयति।

एतस्यामेवाऽवस्थायामेकस्मिन् दिनेऽपराह्णे यदा मन्त्रिपरिषदः सदस्याः सर्वाणि प्रजाकार्याणि समाप्य गतवन्त आसन्। राजा उत्तानपादोऽपि सिंहासनादुत्थाय गन्तुं वाञ्छति स्मैव तदानीमेव क्रीडन्तौ द्वावेव सुतौ समागतवन्तौ। अग्रे उत्तम आसीत् पृष्ठतो ध्रुवः। दृष्ट्वा सिंहासने उपविश्य राजा सुतावङ्के स्थापयितुं करौ प्रासारयत्। अग्रे वर्तमान उत्तमः पितुः क्रोडमारुरोह। पितुः क्रोडं गत्वोत्तमो ध्रुवमपि तत्राऽऽगन्तुं सङ्केतितवान्। पिताऽपि ध्रुवं ग्रहीतुमुत्सुकोऽभवत्। ध्रुवोऽपि तदर्थं सचेष्ट आसीत्। किन्तु सुतावनु तीव्रगत्या चलन्ती सुरुचिरागता। तथाविधमाचरन्तं पतिं ध्रुवञ्च निवारितवती। प्रथमं पतिमवोचत्—स्वामिन् ! मैवं कर्तव्यम्। सिंहसनाऽवस्थितस्य भवतः क्रोडस्याधिकारी ममायं सुत उत्तम एवाऽस्ति। भवान् स्वकर्तव्यं कथं विस्मरति ? राजा तु हतप्रभ आसीदेव, उत्तमोऽपि विस्मितोऽभवत्। राजा पृष्टवान्— सिंहासनोपविष्टस्य राज्ञः क्रोडे क्रीडनेनैव कोऽपि राज्याधिकारी भवति किम् ? राज्ञी सुरुचिः क्रोधमुद्रया राजानं विज्ञापितवती-पतिदेव, किं भवान् विस्मरति यदहं राजमहिष्यस्मि, सम्राज्ञीपदे समासीनाऽस्मि। केवलं मम पुत्र उत्तम एव भवत उत्तराधिकारी वर्तते। सिंहासनादवतीर्य भवान् देशस्य समाजस्य च कस्यचित् पुत्रं क्रोडे स्थापयितुं शक्नोति। किन्तु, उपविष्टे भवति राजसिंहासने उत्तमादतिरिक्तः कोऽपि बालको भवतः क्रोडं नाऽऽरोढुं शक्ष्यति। इत्थं राजानं प्रबोध्य सपत्नीसुतं ध्रुवमपि प्रबोधयितुमारभत —

त्वं बालकोऽसि। पूर्णतया सर्वं न जानासि। त्वमुत्तमस्यानुजोऽसि। त्वं राजसिंहासनाधिकारी नासि। राजसिंहासनोपविष्टस्य पितुः क्रोडमारोढुं मा यतस्व। न केवलमित्येवाऽपित्विदमपि जानीहि यदहं पाणिगृहीती पत्न्यस्मि। अत एव राजमहिष्यस्मि। सम्राज्ञ्यस्मि। तव माता सुनीतिस्तु केवलं भरणपोषणाधिकारिणी भार्याऽस्ति। ज्येष्ठो भवतु वा कनिष्ठो मम पुत्र एव

राज्यस्योत्तराधिकारी भविष्यति। त्वया चैतादृशः दुःसाहसः पुनः कदापि न कर्तव्यः।

सुरुच्या एतत् सर्वं वचनं श्रुत्वा राजा चकितः क्षुब्धो विषण्णस्त्वासीदेव, उत्तमायापि मातुः सुरुचेर्व्यवहारो नाऽरोचत।

राजा उत्तानपादः सिंहासनादवतीर्योत्तमं सुरुच्यै समर्प्य राजभवनं प्रत्यचलत्। राज्ञी सुरुचिरपि पुत्राभ्यां सहाऽन्तःपुरम्प्रति गन्तुमारभत।

तदानीं मातरं भ्रातरञ्चाऽनुचलतो ध्रुवस्य मनःस्थितिर्विचित्राऽऽसीत्। अद्यावधि स एतादृशं कठोरवचनं न श्रुतवानासीत्। विमातुः कठोरेणानेन वचनेन तस्य हृदयं विदीर्णमिव जातम्। नेत्रे तस्याश्रुपूर्णे जाते। या विमाताऽपि, किन्तु प्रतिदिनं स्निह्यति, चुम्बति, धुलिधूसरितं शरीरं प्रोञ्छति सैव चेदृशं कठोरं वचनं वक्ष्यतीति नानुमानमासीत्। एतादृशमपमानं सोढ्वा जीवितशेषेण किं प्रयोजनम्? किन्त्वात्महत्याऽपि 'महापाप' इति श्रूयते। हृदयस्य पीडया नेत्रे त्वश्रुपूर्णे आस्तामेव शरीरमपि रोमाञ्चितं जातम्, पादौ च शिथिलौ जातौ। अत एव पूर्णतया अनुगमनाऽभावात् किञ्चिद्दूरं भूत्वाऽनुचलति स्म। उत्तमस्तस्य मन्दगतिमवलोक्य मातुर्ध्यानमाकृष्टवान्। माता सुरुचिः स्थित्वा समीपमागतं तं प्रोक्तवती-पुत्र, खेदं मा वह। बालोऽसि। त्वं सर्वं नियमं न जानासि। नियमानां पालनं राजधर्मोऽस्ति। अत एव मया यदुक्तं तत्त्वया पालनीयम्। तुभ्यमपि किमपि सुखं दुर्लभं न भविष्यति। केवलं राजसिंहासनोपरि वा सिंहासनोपविष्टस्य पितुः क्रोडे त्वं नोपवेक्ष्यसि। तव माताऽपि राज्यस्य सर्वं सुखं प्राप्स्यति, केवलं राजमहिषीपदं नालङ्करिष्यति। पूर्ववत् विहस, नेत्रयोरश्रूणि मा पूरय, शरीरं प्रसन्नतया रोमाञ्चितं मा कुरु, मनो मा पीडय। पादाभ्यां गतिं देहि, मा शैथिल्यम्। इत्युक्त्वा तस्य मुखमण्डलं स्वाञ्चलेन प्रोञ्छितवती। ध्रुवोऽपि विमातुः स्नेहं प्राप्य धैर्यं धृत्वा तामन्वसरत्। सुरुचिः स्वसुतेन साकं स्वभवनं प्राविशत्। ध्रुवोऽपि स्वमातुर्भवनं प्राप्तवान्।

आगते पुत्रे ध्रुवे सुनीतिः किञ्चिन्म्लानमुखं पुत्रं दृष्ट्वाऽपृच्छत्-पुत्र, औदासिन्यं कथं वहसि? तव मुखमण्डलस्य प्रसन्नता क्व गता? तव शरीरं किञ्चित् कथं रोमाञ्चितम्? कथय पुत्र, किमभवत्? ग्लानेः किं कारणम्?

मातुः स्नेहयुक्तं वचनं श्रुत्वा ध्रुवः साश्रुनयनो भूत्वाऽवदत्-त्वं राज्ञः धर्मपत्नी नाऽसि। राजमहिषी सम्राज्ञी वा पदाभ्यां त्वं सम्मानिता न भविष्यसि। त्वन्तु केवलं 'भरणपोषणाधिकारिणी भार्या' इति पदेनाऽसम्मानिता भविष्यसि। राज्यसिंहासनस्याऽधिकारी ममाऽग्रज उत्तमो भवतु। तत्पदस्याकाङ्क्षापि मम मनसि कदापि नोदेति। किन्त्वद्य सिंहासनाऽऽस्थितस्य पितुः क्रोडादपि वञ्चितोस्मि।



पुत्रस्येदं वचनं श्रुत्वा माता ध्रुवमपृच्छत्-किमेतत्तव पिता कृतवान्? ध्रुवेणोत्तरितम्-सर्वमेतत् समादरणीया माता कथितवती। पिता तु मौनमाकलय्य सर्वं श्रुतं श्रुत्वा चौदासीन्यमभजत, किन्तु किमपि न प्रोक्तवान्।

माता-किं पिता त्वां प्रसन्नतया दृष्टवानपि न? ध्रुवः-यावन्माता नाऽऽगतवती तावदग्रजं क्रोडे निधाय मामपि क्रोडे धारयितुं प्रयत्नवानासीत्। अग्रज उत्तमोऽपि पार्श्वे स्थानदानायोत्सुक आसीत्, किन्तु तदानीमेव माता तत्राऽऽगत्य सम्पूर्णं दृश्यं परिवर्तितवती।

माता-महत्कष्टस्याऽयं विषयः! किन्तु पुत्र, त्वं खेदं मा कुरु। ममाशीर्वादेन स्वपुण्यप्रतापेन च तन्महत्पदं प्राप्स्यसि, यत्पदं प्राप्य प्रातःस्मरणीयो भविष्यसि।

ध्रुवः-तत्पदं कथं प्राप्यते?

माता-धैर्यं धर। यथासमयमुपदेक्ष्यामि।

ध्रुवः-मातः, त्वमेव कथयसि-शुभकार्ये विलम्बो न करणीयः। पुनः शुभस्य शीघ्रमिति सूक्तिरपि प्रसिद्धा। अतो विलम्बं मा कुरु।

माता-त्वं बालकोऽसि केवलं पञ्चवर्षीयः। कार्यमिदं दुःसाध्यमस्ति। यदा वयस्को भविष्यसि तदा कथयिष्यामि, उपदेक्ष्यामि।

ध्रुवः-मातः, त्वमेव यदा-कदा कथयसि ज्ञानं केवलं वयसा एव न प्राप्यते। तपसा प्राप्यते।

माता-पुत्र, यन्मया कथनीयमासीत्, तत्त्वयैव कथितम्। तपसा केवलं ज्ञानमेव न, परमात्माऽपि प्राप्यते।

ध्रुवः-मातः, अहं तप एव करिष्यामि। किन्तु तपः कथं क्रियते इत्यहं न जाने। त्वं कृपया तपसो विधिं वर्णय।

माता-तपसः स्वरूपन्तु पूर्णतयाऽहमपि न जाने। तत्स्वरूपन्तु मुनयो महर्षयश्च जानन्ति। किन्त्वहं जानामीदं यत्तपसि महत्कष्टं भवति। सम्प्रति त्वं

बालकोऽसि। सुकोमलोऽसि। अतः कैशोर्यं प्राप्य तपसे प्रवृत्तो भविष्यसि।

ध्रुवः—तपस्विनां बालकानां कथान्तु त्वमेव कथयसि। तत्किं बालको भूत्वाऽहं न तप्स्यामि ?

माता—पुत्र, मम हृदयं मातृहृदयमस्ति। माता पुत्रस्य क्लेशं सोढुं समर्था न भवति। अतएवाऽहं ब्रवीमि कैशोर्यं प्राप्य त्वं सर्वं कर्तुं समर्थो भविष्यसि।

ध्रुवः—त्वया तु पूर्वमेवाऽऽशीर्वादो दत्तः। तवाऽऽशीर्वादेन सर्वं सुलभं भविष्यति। माता—पुत्र, तव नाम ध्रुवोऽस्ति। त्वं ध्रुवं पदं प्राप्स्यसि। मुनयः ऋषयश्च तव मार्गदर्शनं करिष्यन्ति। त्वं सफलो भूत्वाऽवश्यमागमिष्यसि। तदानीं त्वां दृष्ट्वैव शरीरं त्यक्ष्यामि।

ध्रुवः—अद्यैव गतायां रात्रौ ब्राह्ममुहूर्ते तव चरणयोर्मस्तकं निधायाऽऽशीर्वादं लब्ध्वा गमिष्यामि।

माता—आम्, इत्युक्त्वा क्रोडे निधाय वाष्पवारिणा पुत्रं सिञ्चितवती।

सन्ध्या त्वासीदेव, रविरपि ध्रुवायाऽऽशीर्वादं दत्त्वाऽस्तंगतः।

राजा उत्तानपादस्तस्यां रात्रौ राजभवनस्यैकस्मिन् कक्षे एकाक्येव शयितुं प्रयत्नवानभवत्। किन्तु, निद्रा न समागतवती। विगताऽपराह्णवेलाया घटनायाः कारणेन तस्य मनसि चिन्ताचक्रं चलति स्म। कदाचिद्ध्रुवस्य तिरस्कृताऽऽकारं मुखमण्डलं स्मृतिपटले चित्रपटमिवाऽऽयाति स्म याति स्म च। कदाचिदश्रुपूर्णे नयने ध्यानमकर्षतः स्म, कदापि कम्पमानावधरोष्ठौ हृदयं विदीर्णयतः स्म, कदापि स्वेदपूर्णः प्रशस्तो ललाटो मनस्युद्वेगमुत्पादयति स्म। हा! पुत्रस्याऽनादरो मया कृतः। नारीविवशताया मम लोका उपहासं करिष्यन्ति। तस्य माता सुनीतिरद्य किं कथयन्ती भविष्यति। पुत्रस्य सान्त्वनायै सा यदि वैराग्यं शिक्षयिष्यति चेत्तदा पुत्रविरहतापं कथं सोढुं शक्ष्यामि ? धिक् मां येन सुरुच्या कृतापराधस्य प्रतिकारो न कृतः। न जाने सुरुचिः कं मन्त्रं जानाति यस्य प्रभावेण मे मतिः प्रत्युत्पन्नमतित्वं न प्रदर्शयति। उत्तमो नेर्ष्यालुः। स तु मम क्रोडे स्थानं दातुमनुजञ्चाह्वयितुं प्रयत्नवानासीत्। दुर्भाग्येन तदानीमेव सुरुचिरागता। कठोरेण स्वरेण मम पुत्रवात्सल्यमपाकरोत्। तस्मिन् क्षणेऽहं किं कर्तव्यविमूढोऽभवम्। अधुना पश्चात्तापेन किम् ? श्वः समयं प्राप्य तं ध्रुवं



तस्य मातरञ्च सान्त्वयिष्यामि। सुरुचिर्मम किमपि कथनं न श्रोष्यति। अतः तां निकषा गत्वा किमपि न कथयिष्यामि।

सुरुचिरपि स्वान्तःपुरस्य कक्षे शयानाऽपि न शेते स्म। सा तु क्रुद्धं पतिं प्रतीक्षते स्म। प्रतीक्षारताऽपि साऽपराह्णकालस्य घटनायाः सम्बन्धेऽपि चिन्तयति स्म। यद्यपि तस्या हृद्यपि स्वल्पोऽपराधबोध आसीत्तथापि पुत्रस्य भविष्यचिन्तया चिन्तिताऽऽसीत्। ध्रुवस्य वैलक्षण्यं तस्य मन उद्वेलयति स्म। तस्य बुद्धेश्चमत्कारस्तां पीडयति स्म। तस्य वाग्वैदग्ध्यं तस्य हृदयं व्यथयति स्म। यदि स बाल्यं कैशोर्यञ्चोल्लङ्घ्य यौवनं प्राप्स्यति चेत् प्रजारञ्जनस्य कार्यं सम्पादयिष्यति। तदानीं राजाऽपि तस्मै एव युवराजपदं दास्यति। सरलोऽयमुत्तमोऽपि विरोधं न करिष्यति। तर्हि राजमहिषीपदं साम्राज्ञीपदं वा प्राप्याऽपि किं करिष्यामि ? तद्विगताऽपराह्णे यन्मया कृतं तन्नानुचितम्। अपराह्णस्य घटनया राज्ञो मनसि ग्लानिः क्रोधो वा भवितुमर्हति। किन्तु, तस्य परिष्कारो नातिजटिलः। क्रुद्धं पतिं मधुरेण वचनेन प्रसादयिष्यामि। सुनीतिरपि नास्ति जाटिला। सा बहुवारं कथयति—ध्रुवोऽयं राजपदं न वाञ्छिष्यति। अयञ्च कश्चिन्महापुरुषो भविष्यति। अस्य विलक्षणः स्वभावस्तुच्छपदं राज्यं नाऽभिलष्य किमपि विलक्षणं पदं वाञ्छति। परं मया ध्रुवस्याऽऽदरः कृतः। निस्स्पृहस्य बालकस्याऽयमनादरो यद्यपि नोचित आसीत्तथापि स्वसुतकल्याणाय सदा मया यतनीयमेव।

इतः सुनीतिः पुत्रेण सह स्वपितुं प्रयत्नशीलाऽऽसीत्। किन्तु ब्रह्मवेलायां पुत्रवियोगो भविष्यतीति चिन्तया निद्रां न लेभे। दृढप्रतिज्ञोऽयं गमिष्यत्येव, अतस्तस्य मङ्गलकामनया सा केवलं परमात्मानं ध्यायति स्म। क्षणिकनिद्रायां स्वप्नमपि पश्यति स्म यत् कश्चित् कथयति—चिन्तां मा कुरु। तव पुत्रोऽयं ध्रुवं पदं प्राप्य प्रातःस्मरणीयो भविष्यति। ध्रुवो निश्चिन्त आसीत्। मातुराशीर्वादं प्राप्य सर्वा मार्गबाधा दूरीकर्तुं शक्ष्यतीति दृढविश्वस्त आसीत्। यद्यपि सोऽपि ब्राह्मवेलां प्रतीक्षमाणा गभीरां निद्रां न प्राप्तवान्, तथापि शयनाऽऽनन्दमनुभूतवान्।

कालक्रमेण ब्राह्मवेलायाः समयः समागतः। उभौ मातृपुत्रौ यथासमयमुत्थाय नित्यक्रियां सम्पादितवन्तौ। तदनन्तरं ध्रुवो मातुश्चरणौ ववन्दे। माताऽऽशीर्वादं दत्त्वा पुत्रं प्रेषयन्ती कथयामास—पुत्र, सर्वप्रथमं नगरं निकषा विद्यमानमुपवनं गत्वा सप्तर्षीणां दर्शनं कृत्वा मार्गदर्शनं गृहाण। तेषामुपदेशेन

यथानिर्दिष्टं मार्गं प्राप्य तपस्तप्त्वा यदिच्छसि तत्पदं प्राप। किन्तु, त्वया न विस्मर्तव्यं यत् पुनरागत्य मम नयनाभ्यामानन्दो दातव्यः। ध्रुवः 'ओ३म्' इति कथयित्वा पुनः मातुश्चरणौ स्पृष्ट्वा गृहान्निर्गतः।

सूर्योदयो नासीत्, किन्तु पूर्वस्यां लालिमा राजते स्म। खगा निजनीडान् परित्यज्याऽऽकाशे डयमानाः कूजन्ति स्म। केचन जना अपि प्रातकालीनं वायुं सेवितुमितस्ततो भ्रमन्ति स्म। दूर्वादलेषु वनस्पतिषु च तुषारबिन्दवो राजन्ते स्म। रवेः रक्तिमया लतावृक्षादयः सर्वेऽनुरञ्जिता आसन्। एतस्यां स्थितावेव बालको ध्रुवो जनानां नेत्राभ्यामात्मानं गोपायन्नुपवनस्य दिशि तीव्रगत्याऽवर्धत। तदानीं तस्य मनसि ऋषीणां दर्शनस्येच्छा प्रबलतमाऽऽसीत्। सहसा स उपवनं प्राविशत्। तदानीं सूर्य उदयगिरिमारुह्य पूर्णरूपेण श्वेतिमां धृतवानासीत्। चलन् ध्रुवस्तत्रोपस्थितो यत्र सप्तर्षयः स्व-स्वाऽऽसनेषूविष्टा आसन्। ते च क्रमशः इमे सप्तर्षय आसन्–मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः क्रतुः, वसिष्ठश्च। ध्रुवस्तान् समया प्राप्य तान् परमश्रद्धया ननाम। स्वपरिचयञ्च बालसुलभवाचाऽददात्–पूज्यचरणाः महात्मानः, भवन्तो मां सुनीतेर्गर्भादुत्पन्नं नृपतेरुत्तानपादस्य पुत्रं जानन्तु। मम धनस्य लोभो नास्ति। राज्यपदस्याप्याकाङ्क्षा मम मनसि न विद्यते। अहन्तु सर्वोत्तमं स्थानं प्राप्तुमिच्छामि।

ध्रुवस्येदं वचनं श्रुत्वा ऋषीणां प्रतिनिधित्वेनैक ऋषिरवदत्–बालक, त्वन्तु पञ्चवर्षीयोऽसि। निर्वेदस्य समुचितं कारणं न दृश्यते। सम्प्रति चिन्तायाः कोऽपि विषयो नाऽवलोक्यते। सम्प्रति तु तव पितैव राजाऽस्ति। तव किञ्चिदिष्ट-वस्त्वपि नष्टम् इत्यपि नावलोक्यते। तव शरीरे कश्चन रोगोऽपि न दृश्यते। तथापि तव मनसि ग्लानिर्विद्यते। ग्लानेः किं कारणमिति कथय।

ध्रुवेणोक्तम्–महात्मानः, यद्यपि मम मातुः सुनीतेः मम च हृदि राज्यलोभो न वर्तते तथापि मम विमाता सुरुचिः पितुः क्रोडादपि मां वञ्चितवती। पितुः समक्षमेव मामपमानितवती। कथितवती यत्–त्वं सिंहासनोऽवस्थितस्य पितुः क्रोडस्याऽप्यधिकारी नासि। अत एव मम मनसि ग्लानिर्वर्तते। अहं तपसा येन विधिना वा भवतु, सर्वोत्तमं स्थानं प्राप्तुमिच्छामि।

ध्रुवस्य निष्ठाम्, दृढविश्वासम्, सांसारिकताम्प्रत्यनास्थाञ्च वीक्ष्य सर्वे ऋषय एकमेवोपदेशं तस्मै दत्तवन्तो यत्त्वं विष्णुमाराधय। यतो हि विष्णुरेव सर्वकारणकारणमस्ति। जगदिदं केवलं विष्णुना व्याप्तमस्ति। स



एवाऽऽदिमध्याऽन्तरहितोऽस्ति। परमपुरुषो जनार्दनोऽस्ति, अव्ययोऽस्ति, अच्युतो वर्तते, परमधामाऽस्ति, जगत्पतिरस्ति, यज्ञपुरुषोऽस्ति। तस्यैव परात्परस्याऽऽराधनया सर्वं सुलभं भवति।

ऋषीणां वचनं श्रुत्वा ध्रुवो विनीतेन स्वरेण पुनरपृच्छत्–परमपूज्या महात्मानः! आराध्यो देवस्तु मया ज्ञातः। किन्तु तस्याऽऽराधनाय विधिं वर्णयन्तु भवन्तो येन विधिनाऽहं तमाराधयानि। सर्वेषामृषीणां सारभूतमेकेन ऋषिणा कथितम्– बालक ध्रुव, ध्यानेन शृणु। सर्वप्रथमं सर्वेभ्यो बाह्यविषयेभ्यो मनः परावर्त्य केवलं जगदीश्वरे परमात्मनि संयोजयेत्। एकाग्रचित्तेन तन्मयत्वेन च **"ओ३म् नमो भगवते वासुदेवाय"** इति मन्त्रस्य जपं कुर्यात्। मन्त्रोऽयं पुरा तव पितामहेन स्वायम्भुवेन मनुना जपित आसीत्। त्वं यमुनातटस्थितं मधुवनं गत्वा तपस्तप्तुमारभस्व। एवं कथयित्वा मधुवनस्य मार्गमपि निर्दिष्टवान्।

ध्रुवः ऋषीणामुपदेशवचनं श्रुत्वा मधुवनम्प्रति चलितुमारभत। तदानीं **'ओ३म् नमो भगवते वासुदेवाय'** इति मन्त्रं जपन्नासीत्।

इतः प्रातःकाले निद्राऽऽलस्यं विहाय राजा उत्तानपादः प्रातःकृत्यं सम्पाद्य चिन्ताकातरवदनोऽन्तःपुरस्य सुनीतेर्भवनं गतवान्। तत्र ध्रुवं नाऽवलोक्य पुत्रवियोगव्यथितहृदयां शरीरेणाऽतिखिन्नां म्लानमुखीञ्च सुनीतिं पृष्टवान्– क्वाऽस्ति ध्रुवः ? त्वञ्च कथं खिन्नाऽसि ?

सुनीतिरश्रूण्यञ्चलपटेन प्रोञ्छयन्त्यवदत्–किं भवन्तो न जानन्ति यत् ह्यो भवद्भिरेवाऽपमानितो भूत्वा ध्रुवः खिन्न आसीत्। खिन्नतया तस्य हृदि वैराग्यं जातम्। अतोऽद्य न पितुः क्रोडमपितु सर्वोत्तमं स्थानं प्राप्तुं तपस्तप्तुं वनं जगाम।

राजा–वनं जगाम ? त्वया वनं गन्तुं स कथमाज्ञापितः ?

सुनीतिः–स्वामिन्, यद्यपि ध्रुवः पञ्चवर्षीयो बालकोऽस्ति तथापि मातुः सुरुच्या दुर्व्यवहारेण भवताञ्चौदासीन्येन परमखिन्नो भूत्वा वैराग्यं प्राप्तवान्। मया प्रबोधितोऽपि स्वसंकल्पान्न विचलितः।

राजा–त्वयाऽहं कथं न सूचितः ? सुनीतिः– स्वामिन्, सूचितैरपि सप्रयत्नैर्भवद्भिः स स्थातुं न शक्यते स्म। यतस्तस्य मनसि वैराग्यमासीत्। तद् वैराग्यं केनाप्यवरोद्धुं न शक्यते।

राजा—हा ? पुत्र ! वयसः पञ्चमे वर्षे किल त्वयि वैराग्यं जातम् ? तवाऽनेन वैराग्येणाऽहं कलङ्कितोऽभवम्। सुनीते, तव नीतेरनुसरणेनान्तरेण ममेयं दशा जाता। इतिहासस्य कलङ्कोऽभवम्। कोऽपि मां श्रद्धया न स्मरिष्यति। अहमप्यद्यावधि शेषजीवनं वैराग्येण यापयिष्यामि।

इति कथयित्वा राजा ततः सुरुचेर्भवनं ययौ। गत्वा च तत्र सुरुचिं सम्बोध्य कथितवान्—सुरुचे, तव पुत्र उत्तमो राजा भविष्यति। अस्य मार्गो निष्कण्टको जातः। ध्रुवस्तपस्तप्तुं न जाने कुत्र गतः ? तव दुर्व्यवहारेण मम च स्त्रैणतया तस्य मनसि वैराग्यं जातम्। अहञ्चाद्य आरभ्य वीतराग एवशेषजीवनं निर्वाहयिष्यामि। इत्युक्त्वा तीव्रगत्या तस्माद्भवनान्निर्गत्य राजभवनस्य स्वकक्षं ययौ। राज्ञोऽभूतपूर्वं व्यवहारमवलोक्य सुरुचिरपि वीतरागत्वमनुभूय पुत्रमुखमवलोकितवती। सोऽप्यतिखिन्न आसीत्। खिन्नेन मनसा च कथितवान्—मातः, अहन्तु क्वापि तपस्तप्तुं न गमिष्यामि, किन्तु सांसारिकात् सुखात् निःस्पृहो भूत्वैव शेषजीवनं यापयिष्यामि। यतोऽहमेवाऽनुजस्य ध्रुवस्य वैराग्यस्य हेतुरस्मि। इति कथयित्वा ध्यानमग्नोऽभवत्। तदानीं सुरुचेरपि मोहभङ्गो जातः। साऽपि मनस्येव संकल्पं कृतवती—अहमपि समस्तां सांसारिकीं तृष्णां तिरस्कृत्य शेषजीवनमनासक्तभावेन यापयिष्यामि।

सुनीतिस्तु सुनीतिरेवाऽऽसीत्। सा त्वनासक्ताऽऽसीदेव जीवनस्याऽन्तिमे क्षणे पुत्रमुखदर्शनाऽऽकाङ्क्षया धैर्यं धारयन्ती पूर्ववज्जीवन्त्यासीत्।

राजभवनस्येयं स्थितिः। परं ध्रुवस्तु **'ओ३म् नमो भगवते वासुदेवाय'** इति मन्त्रस्य जपं कुर्वन् मधुवनं प्राप्तुं गतिशील आसीत्। यदा-कदा विष्णुमिदमपि प्रार्थयति स्म—मार्गं दर्शय, मधुवनं प्रापयेति।

ध्रुवस्यैतेन वैराग्येण, प्रार्थनया च देवलोको विष्णुलोकश्च प्रभावितोऽभवत्। महर्षिनारदस्य मनोऽप्युद्विग्नं जातम्। महर्षिणा विचारितम्—कुत्र किञ्च भवति ? मनसाऽनुभूतम्—कश्चित् पञ्चवर्षीयो बालको वैराग्येण विष्णुं ध्यायन् व्रजति। वनमार्गस्य दुःखान्यगणयन् मधुवनं प्रति गच्छति। स मया परीक्ष्यः सहाय्यश्चास्ति। इति विचार्य ध्रुवं समयाऽवातरदपृच्छच्च।

महर्षिनारदः—बालक, कोऽसि त्वम् ? कुत्र गच्छसि ? किमर्थं गच्छसि ? किं जपसि ? किञ्च वाञ्छसि ?



महामुनिमवलोक्य प्रणम्य च ध्रुवः—अहं मातुः सुनीतेर्गर्भादुत्पन्नो राज्ञः उत्तानपादस्य पुत्रो ध्रुवोऽस्मि। मधुवनं गन्तुं प्रयत्नशीलोऽस्मि। सप्तर्षीणामनुमत्या तत्र तपस्तप्तुं गच्छामि। तत्र तपस्तप्त्वा सर्वकारणकारणं विष्णुं साक्षात्कर्तुमिच्छामि। दर्शनेन कृतकृत्यो भवितुमिच्छामि। ऋषिभिरुपदिष्टम्—**'ओ३म् नमो भगवते वासुदेवाय'** इति मन्त्रं जपामि। वरदानस्वरूपं ध्रुवं पदं प्राप्तुं वाञ्छामि।

महर्षिनारदः—बालक, पञ्चवर्षीयोऽसि त्वम्। तपसि महत् कष्टं भवति। बुभुक्षया पिपासया च पीडितो भविष्यसि। असामान्येन तपसा स विष्णुः प्राप्यते। कथं बालहठं करोषि ? ध्रुवं पदं कोऽपि न प्राप्नोति। भौतिकं किमपि पदं वाञ्छसि चेदहमेव दास्यामि। महत्तपसः कष्टेन किं प्रयोजनम् ?

ध्रुवः—महर्षे, यदि भौतिकं किमपि पदं भवन्त एव दास्यन्ति चेन्मधुवनस्य तत्स्थानस्य मार्गं दर्शयन्तु भवन्तो येन शीघ्रं तत्र गत्वा तपसि प्रवृत्तो भवेयम्। विष्णुं साक्षात्कृत्य तमेव याचिष्ये।

महर्षिनारदः— यथा नाम तथा गुणोऽस्ति। दृढप्रतिज्ञोऽसि। अतः शीघ्रमेव मधुवनं प्राप्स्यसि। नेत्रनिमीलनं कुरु। सशङ्खचक्रम्, सकिरीटकुण्डलम्, सपीतवस्त्रम्, सरसिरुहेक्षणम्, सहारवक्षःस्थलकौस्तुभश्रियञ्च विष्णुं मनसि धारय। इति कथयित्वा महर्षिनारदः तस्य शिरो दक्षिणहस्तेन स्पृष्टवान्। ध्यानमग्नो ध्रुवो महर्षिणा नारदेन सह मधुवनस्य तत्स्थानं प्राप्तवान् यत्तपोयोग्यमासीत्। तदानीं महर्षिनारदो बालक ! अत्रैव त्वं तपः कुरु इति कथयित्वाऽन्तर्दधौ।

तच्चमत्कारं दृष्ट्वा ध्रुवस्य मनः प्रसन्नं जातम्।

तत्स्थानमतिरम्यमासीत्। सर्वत्र शोभनास्तरवो वनस्पतयो लताश्च राजन्ते स्म। प्रशस्ता धरा परमरमणीया, मनोहारिणी, मनसि वैराग्योत्पादिका सांसारिकाणामपि मोहभङ्गकारिणी चासीत्। तत्रैव कलकलनादिनी, वीचिविलासवती, तरणितनूजा कालिन्दीत्यपरनाम्नी यमुना प्रवहति स्म। तां धरां विलोक्य ध्रुवस्य मनः प्रसन्नं जातम्। परितः परिभ्रम्य तेन तस्य स्थानस्य रमणीयतां पवित्रताञ्चावलोक्य तपसे निश्चितवान्।

सप्तर्षिभिः महर्षिणा नारदेन च यदुपदिष्टम् आसीत्तथैव सर्वप्रथमं संसारस्य विषयेभ्यो मनः पृथक् कर्तुं प्रारब्धवान्। तदानीं मनसश्चाञ्चल्य-

मनुभूतवान्। मनः पश्चात् परावृत्य नगरम्प्रति गच्छति। अन्तःपुरस्थस्य भवनस्य सुनीतिर्माता दृश्यते। उत्तमेनाग्रजेन सह क्रीडा ध्यानमाकर्षति। मातुः सुरुचेर्दुर्व्यवहारः पितुश्च मौनधारणं स्मृतिपटे चित्रितौ भवतः। किन्तु, सर्वेभ्यो मन आकृष्य भगवति विष्णौ संयोजयति।

यद्यपि ध्रुवस्य मनोऽपि चाञ्चल्यं न त्यजति। यदा-कदा विगतानां कर्मणां दिशि धावति तथापि ध्रुवो विचलितो न भवति। बलपूर्वकं तदाकृष्य सर्वकारणकारणस्य चराचरस्वामिनो विष्णोर्दिश्युन्मुखीकरोति। एवं सततमभ्यासेन, जपस्य नैरन्तर्येण, ध्यानस्य माहात्म्येन मनसि विष्णुं पश्यति। यथा-यथा ध्यानस्याऽभ्यासोऽवर्धत तथा-तथा चित्तस्यैकाग्रताऽपि दृढा जाता। क्रमशः दिनानि गतानि मासाश्च व्यतीताः। शनैः शनैः भोजनस्य जलस्याऽप्यावश्यकता समाप्ता।

पूर्वतो मधुवनवासिनो महात्मानो बालकस्य ध्रुवस्य तपसो माहात्म्यं ज्ञात्वा परस्परमालपन्ति स्म—पञ्चवर्षीयोऽयं बालको बुभुक्षां पिपासाञ्च जितवान्। अहर्निशं ध्यानमग्नस्तिष्ठति। एतस्येदं पूर्वजन्मनोऽपि सुफलं प्रतीयते।

एकदा ध्यानमग्नस्य ध्रुवस्य मनसि हरिराविर्बभूवा ध्यानस्य स्थितावेव नारायणमवलोक्याऽऽत्मविस्मृतिं ययौ। तदानीं किमभवदिति नान्वभवत्। सर्वं धारयितुं समर्था धरा तद्भारं वोढुं समर्था नाऽभवत्। सा पुनः पुनरकम्पत। ध्रुवस्य तपसः प्रभावेण तद्वनवासिनो महात्मानश्चिन्तिता अभवन्। बालकोऽयं न जाने किं करिष्यति ? केचित्तु तस्य ध्रुवस्य तपोनिष्ठां सहिष्णुतां प्रभावञ्च स्मारं स्मारमात्मनो निन्दन्ति। कथयन्ति चाऽस्माकं तपोभिः किं यद् बुभुक्षया पिपासया च पीडिता भवामः। बालकोऽयं न कामपि क्रियां करोति, न भुङ्क्ते, न पिबति। केवलं यदा-कदा श्वसिति, न जाने कथं जीवति ?

तपोभूमिवासिनां महात्मनां यथा-यथा चिन्ता वर्धते तथा-तथा ध्रुवस्य तपसः प्रभावः संवर्धते। यदा ध्रुवः स्थित्वा ध्यानाऽवस्थितो भवति तदापि भूकम्पो भवति। श्वसिति चेद् झंझोत्पद्यते, तदा पार्श्वस्था लता वनस्पतयश्च तु धरां चुम्बन्त्येव वृक्षा अपि वेगेन प्रकम्पन्ते। यमुनाजले उद्वेलनमिव जायते। तस्य क्षेत्रस्य विविधा जीवा व्याकुलतां प्राप्नुवन्ति।

यथा-यथा तपोऽवर्धत तथा-तथा तस्य प्रभावस्य व्यापकताऽप्यवर्धत। एकदा स दक्षिणेन पदेन स्थित्वा ध्यानमग्नोऽभवत्। तस्मिन् क्षणे तस्य दक्षिण-



भागस्य धरा पातालं गच्छन्तीव बभूव। यदा स वामपादेनाऽवस्थितोऽभवत् तस्मिन् क्षणे वामभागस्य धरा पातालं स्पृशन्तीव जाता। शेषनागश्चिन्तयामास—पृथ्व्यां कुत्र किं भवति ? धराया दशेयं भविष्यति चेदहं भारं कथं वक्ष्यामि ? स विष्णुं ध्यात्वा प्रार्थयत्—प्रभो, सर्वस्वधारणसमर्था यद्यचला न स्यास्यति चेदहं धरां धारयितुं कथं समर्थो भविष्यामि। इत्थं शेषनागश्चिन्तितवानेवाऽऽसीत् तदानीं तपोनिष्ठो ध्रुवः पादाऽङ्गुष्ठयोर्बलेन धरायामतिष्ठत्। तस्मिन् क्षणे तु विचित्रा दशा जाता। सा वेगेनाऽकम्पत। तस्य कम्पनस्य प्रभावं भूधरा अपि वोढुं समर्था नाऽभवन्। तेषु केचन तु मध्यभागेन विदीर्णा अजायन्त। तेषां कम्पनेन धराऽतिशयेन कम्पमाना बभूव। तदानीं समुद्रस्याऽपि दशा दयनीया जाता। सागरस्य विह्वलतया तस्य जन्तवोऽप्युद्विग्नतां प्राप्तवन्तः। एवं न केवलं भूलोकोऽपितु देवलोकोऽपि प्रभावितोऽभवत्। इन्द्रादयो देवाश्चिन्ताऽतिशयतयोद्विग्ना एवाऽऽसन्। तावन्महर्षिनारदस्तत्र ययौ। महर्षिनारदमवलोक्येन्द्रादयो देवास्तं सादरं पृष्टवन्तः—महर्षे, कथमयं लोकोऽपि कम्पते ? अत्रापि कथं न शान्तिः ? कथं सर्वत्र हाहाकार इव श्रूयते ? अप्सरसो नृत्यं कर्तुं न वाञ्छन्ति। देवानां मनःसु न स्थिरता। नन्दनवनेऽपि नाऽऽनन्दः। भवन्तस्तु सर्वत्र भ्रमन्ति। सर्वं जानन्ति। कथयन्तु भवन्तः। कुत्र किं भवति ? अस्माभिः किं कार्यम् ?

नारायण ! नारायण ! इति समुच्चारयन् महर्षिनारदोऽब्रवीत्—भो देवाः ? भूतले एकोऽद्भुतो बालक उत्पन्नः अस्ति। स मातुः सुनीतेर्गर्भादुत्पन्नो राज्ञ उत्तानपादस्य पुत्रोऽस्ति। विमात्रा कृताऽपमानेन राज्ञा च मौनधारणतया तिरस्कृतेन पञ्चवर्षीयेण बालकेन ध्रुवेण ध्रुवं पदं प्राप्तुं मधुवने तपस्तप्यते। तस्य तपसः प्रभावः सर्वत्र परिलक्ष्यते। यावत् तपसो विरतो न भविष्यति अथवा सर्वोपरि ध्रुवं पदं न प्राप्स्यति तावच्छान्तिर्न भविष्यति।

देवराज इन्द्रोऽवदत्—बालहठोऽयं प्रतीयते। सर्वोपरि ध्रुवं स्थानं बालकोऽयं प्राप्स्यति ? अहं येनोपायेन स्यात्तपसः तं निवर्तयिष्यामि। छलेन बलेन येन विधिना तपसः तं पृथक् कृत्वैव शान्तिं लप्स्ये।

महर्षिणा नारदेन कथितम्—स विष्णुभक्तोऽस्ति। विष्णुं ध्यायति। वयं विष्णुमेव प्रार्थयामः। भगवतो नारायणस्य प्रसन्नतयैव बालकस्तपसः पृथग् भविष्यति, नान्यथा।

इन्द्रोऽवदत्–किन्तु, प्रथमं वयं देवास्तं बालकं तपसः पृथक् कर्तुं प्रयत्नं करिष्यामः।

महर्षिनारदोऽब्रवीत्–कुर्वन्तु भवन्तः। पुनः "नारायण! नारायण!" इत्युच्चारयन् स्वर्गाद् बहिर्निरगच्छत्।

गते महर्षौ नारदे इन्द्रो यामानामभिर्देवैः सह संमन्त्र्य बालकस्य ध्रुवस्य ध्यानभङ्गं कर्तुं यतितवान्। इन्द्रेण सह कूष्माण्डादय उपदेवा विविधोपद्रवैरपि ध्यानभङ्गकरणे सफला नाऽभवन्। विविधानि रूपाणि धृत्वा कोलाहलमकुर्वन्। भयोत्पादका राक्षसा भूत्वा तमुपरि पाषाणखण्डानि प्राक्षिपन्। कदाचिद् घोरया वृष्ट्या जलप्लावनमिवाऽकुर्वन्। कदाचित्तस्याऽङ्गानि धृत्वा तं कम्पयितुं प्रयत्नं कृतवन्तः। एवं नानाविधैः प्रयत्नैरपि तस्य समाधिभङ्गं नाऽकुर्वन्। यदा विष्णुमयो ध्रुवो विचलितो नाऽभवत्तदा देवा मायामयीं ध्रुवस्य मातरं सुनीतिं परिकल्प्य तस्य ध्यानभङ्गाय प्रेरितवन्तः।

सा मायामयी सुनीतिः साश्रुनयना भूत्वा तस्य ध्रुवस्य पुरत उपस्थिता। हे पुत्र ! इति सम्बोध्य करुणामयं वचनं वक्तुमारभत–पुत्र! कोमलकलेवरनाशकं कठिनं तपः त्यज। विविधाभिः कामनाभिस्त्वां प्राप्तवती। विमातुः कठोरेण वचनेन पितुश्च मौनधारणेन त्वं मां मा तिरस्कुरु। आश्रयहीनाया मम त्वमेवाऽऽधारोऽसि। पञ्चवर्षीयस्त्वं सुकोमलोऽसि। त्वया नैतादृशमुग्रं तपः करणीयम्। अनेन तपसा किं प्राप्स्यसि ? तवाऽयमाग्रहो न समुचितः। क्लेशकरेण निष्फलेन तपसा किं ? तवाऽयं कालो बाललीलया क्रीडनस्याऽस्ति। अनन्तरमध्ययनस्य समय आगमिष्यति। अध्ययनानन्तरं गार्हस्थ्याश्रमस्य समये विविधभोगानां भोगस्य काल आगमिष्यति। तदनन्तरं जीवनस्य चतुर्थे भागे त्वया तपः करणीयम्। हे पुत्र ! सुकुमारेऽस्मिन् बाल्यकाले क्रीडाविनोदेन त्वयाऽऽचरणीयम्। ईदृशमतिकष्टकारकमुग्रं स्वपीडकं परपीडकञ्च तपो निषिद्धमस्ति। त्वया त्वस्मिन् बाल्यकाले केवलं मम प्रसन्नतायै यतनीयमासीत्। अस्यामवस्थायां कृतमिदं तपो धर्मविरुद्धमस्ति। धर्मविरुद्धेनाचरणेन त्वं मां मा पीडय। इत्थं क्रन्दन्ती, अश्रुभिः कपोलौ क्लेदयन्ती, भुवि लुठन्ती, कराभ्यां वक्षःस्थलं ताडयन्ती सेदं कथितवती यदहं तवाऽग्रे प्राणान् त्यक्ष्यामि।

मायामय्याः सुनीतेः क्रन्दनं श्रुत्वाऽपि बालकस्य ध्रुवस्य ध्यानभङ्गो न जातः। स नेत्रे उन्मील्य तस्या दिशि नाऽपश्यत्। परात्परे परब्रह्मणि



परमात्मनि विष्णौ समाविष्टचित्तो ध्रुवो न किमप्यजानाद् यन्ममाग्रे किं भवति।

अनेन विधिना मायामयी सुनीतिरसफला भूत्वा घोरेण स्वरेण चीत्कारं कुर्वन्त्यवदत्–अरे पुत्र ! इतः पलायस्व। पश्य, पश्य, एतस्मिन् भयङ्करे वने विकृताऽऽकारा राक्षसाः शस्त्राणि धारयन्तः समागच्छन्ति। एवं कथयन्ती साऽन्तर्दधौ।

तदानीं बहवो राक्षसाः प्रादुर्बभूवुः। ते सर्वे भीषणाऽऽकृति-धारिणस्त्वासन्नेव तेषां हस्तेषु भयप्रदानि शस्त्राण्यप्यासन्। तेषां मुखेभ्यो वह्नेर्ज्वाला निःसरन्ति स्म। ते तं बालकं ध्रुवं निकषाऽऽगत्य द्योतमानानि शस्त्राणि व्यावर्तमानानि कुर्वन्तः कोलाहलमकुर्वन्। विविधा सिंहव्याघ्रचित्रकादयो हिंसकाः पशवोऽपि तत्राऽऽविर्भूय स्वभीतिप्रदैर्नादैस्तमुद्वेलयितुं प्रयत्नमकुर्वन्। स्वमुखैर्वह्निज्वालां प्रकटयन्त्यः शताधिकाः शिवाश्च प्रादुर्बभूवुः। ते दानवा मारय, मारय, छिन्धि, छिन्धि, भक्षय-भक्षयेत्यादिभिः शब्दैस्तं त्रासयितुं यतितवन्तः। किन्तु, गोविन्दासक्तचित्तस्य तस्य बालस्य ध्रुवस्य मनः किमपि नानुभूतवत्। सर्वमिदं दृष्ट्वाऽसफलप्रयत्ना देवा विलीनासु सर्वासु मायासु परमभीता व्यग्राश्चाऽभवन्। महर्षेर्नारदस्य मन्त्रणाया अनादरस्य फलमिति मत्वा परमखिन्ना अभवन्।

ध्रुवं समया समवेता देवाः समेत्य देवलोकं गत्वा महर्षेर्नारदस्य मन्त्रणां संस्मृत्य विष्णोः शरणं जग्मुः। ध्यानाऽवस्थिता भूत्वा नारायणं प्रार्थयामासुः–प्रभो देवाधिदेव, जगन्नाथ, परमेश्वर, पुरुषोत्तम, वयं बालकस्य ध्रुवस्य तपसा संतप्तास्त्वां शरणमागताः। हे देव, यथा चन्द्रः स्वकलया वर्धते तथैव तस्य तपोऽहर्निशं वर्द्धते। हे प्रभो, तं तपसो निवर्तय। न जाने बालोऽयं किमिच्छति ? इन्द्रत्वम्, वरुणत्वम्, कुवेरत्वम्, सूर्यत्वं, चन्द्रत्वं वा किं कामयते ? इति वयं न जानीमहे। हे परमात्मन्, त्वमस्मासु प्रसीद। उत्तानपादस्य तनयं ध्रुवमाशु तपसो निवर्तय।

देवानां प्रार्थनां श्रुत्वा भगवान् विष्णुरुवाच–हे देवगणाः, बालोऽयं युष्माकं पदानि न वाञ्छति। तस्येच्छामहं वेद्मि। अहं तस्य तामभिलाषां पूरयिष्यामि। यूयं निश्चिन्तभावेन स्वपदेषु स्थित्वा स्वकार्याणि कुरुत। एवं तान् देवान् सान्त्वयित्वा विष्णुर्ध्रुवं निकषा गत्वा चतुर्भुजेन रूपेणाऽऽविर्बभूव।

चतुर्भुजेन रूपेणाऽऽविर्भूतो विष्णुस्तपस्यारतं ध्यानमग्नं ध्रुवमुक्तवान्–हे

उत्तानपादपुत्र, ध्रुव, तव कल्याणं भवतु। अहं तव तपसा प्रसन्नो भूत्वा तुभ्यं वरं दातुं प्रकटोऽस्मि। त्वं सम्पूर्णबाह्यविषयेभ्यश्चित्तं समाकृष्य मयि कृतवानसि। अतोऽहं त्वयि सम्यक् सन्तुष्टोऽस्मि। अतो यथेष्टं वरं वृणीष्व।

देवदेवस्य भगवतो विष्णोरित्थं वचनं श्रुत्वा ध्रुवेण नेत्रे उन्मीलिते। तदानीं तदेव रूपं ददृशे यद्रूपं ध्यानगतमासीत्। तदानीं स भूमौ निपत्य प्रणनाम। तत्क्षणं स रोमाञ्चितोऽभवत्। देवदेवं स्तोतुमैच्छत्। किन्तु, तस्य कृते तस्य हृदि शब्दा नासन्। अतो व्याकुलो भूत्वा तमेव शरणं प्राप्तवानवदच्च– हे प्रभो, सम्प्रति सर्वप्रथमं त्वां स्तोतुमिच्छामि। सर्वप्रथमं मह्यं तां शक्तिं देहि यया त्वां स्तोतुं शक्नुयाम्।

भक्ताग्रगण्यस्य बालभक्तस्य ध्रुवस्य प्रार्थनां याचनाञ्च श्रुत्वा हरिः प्रसन्नो भूत्वा स्वैकहस्तस्य शङ्खस्याग्रभागेन बालभक्तस्य शिरः स्पृष्टवान्। तेन कारणेन भावविह्वलस्य बालभक्तस्य ध्रुवस्य मुखादिदं स्तोत्रं निर्गतम् –

अहह ! धन्यमिदं मम जीवनं
नयनगोचरतामखिलेश्वरः।
हृदि ममासीद् या खलु कल्पना
तदनुरूपमिदं तव दर्शनम् ॥१॥

करसरोरुहशङ्खयुतः प्रभु–
रपि च चक्रयुतः ससुदर्शनः।
मुकुटमण्डितभव्यशिरस्तथा
कनककुण्डलयोश्च विभूषितः ॥२॥

वसनपीतविभूषितभास्वरः
कमलकान्तिमयश्च सुलोचनः।
उरसि हारविमण्डितकौस्तुभः
प्रकटितः समभूच्च चतुर्भुजः ॥३॥

अयि विभो सफलं मम जीवनं
सुलभतामभजत्तव दर्शनम्।
अयि कृपामय हे करुणामय
मम मनो नितरां कुरु निर्मलम् ॥४॥



अयि परात्पर हे जगदीश्वर
निखिलविश्वनियामक हे विभो।
अपि च त्वां भवकारणकारणं
भुवि निपत्य नमामि पुनः पुनः ॥५॥

त्रिविधतापनितप्तमिदं जगत्
तव च वै कृपया परिमुक्तताम्।
सुलभते ह्यत एव कृपां कुरु
मयि सदा प्रणमामि पुनः पुनः ॥६॥

जगदिदं परिकल्प्य महाप्रभो
सकललोकमिमं परिसृज्य च।
ललितखेलनतत्परतां सदा
व्रजसि नाथ मुहुः प्रणमामि त्वाम् ॥७॥

त्वमसि नाथ सुभक्तदयानिधि-
रथ च मां निजभक्तियुतं कुरु।
अहरहश्च जपानि गतस्पृहः
प्रलयकालसमागमवीक्षणः ॥८॥

सुभग हे समलङ्कृत हे प्रभो
सजग हे सुकुमार सुकोमल।
प्रबल हे बलवत्तम हे बलिन्
सकलशक्तिसमन्वितशक्तिद ॥९॥

मम च बालहठैरपि हे विभो
परमतुष्टिमहो ह्यनुभूतवान्।
अथ च प्रार्थनया करुणानिधे
मनसि मे सततमुपविश्यताम् ॥१०॥

मम च या पथदर्शनकारिणी
प्रजननी च 'सुनीति'प्रदर्शिनी।
अथ च सापि न दूरगताऽस्तु वै
ध्रुवपदं यदि मे परिदीयते ॥११॥

भावविह्वलस्य ध्रुवस्य मुखनिर्गतं स्तोत्रं श्रुत्वा परात्परः परमेश्वरो विष्णुः परमां प्रसन्नतां प्राप्तवान्। प्रसन्नमनसा वाचा च ध्रुवमब्रवीत्—बालोऽपि हे परमभक्त, तव तपसा चानेन च स्तोत्रेण च परमप्रीतोऽस्मि। त्वं यथेच्छं वरं वरय।

परमाऽऽराध्यस्य भगवतोर्विष्णोर्वचनमाकर्ण्य ध्रुवः करौ सम्पुटीकृत्य गद्गदेन वाचाऽवदत्—

प्रभो, त्वद्दर्शनं कृत्वा मम तपो जीवनञ्च सफलं जातम्, तथापि हे अन्तर्यामिन्, विमाता सुरुचिः सिंहासनाऽवस्थितस्य पितुः क्रोडमारोहन्तं मां कथितवती यत् भार्यायाः सुनीतेर्गर्भादुत्पन्नस्त्वम्। अतः सिंहासनाऽवस्थितस्य पितुः क्रोडं नारोढुं शक्नोषि। अस्य क्रोडस्याऽधिकारी केवलं मम पुत्र उत्तम एव। तस्याः कटुवचनं श्रुत्वाऽपि पिता मौनेन तस्या वचनस्यैव समर्थनमकरोत्। अनेनाऽपमानेन मनसि मम ग्लानिरजायत। संसाराद् वैराग्यमभवत्। अतो मातुः सुनीतेः प्रेरणया ब्रह्माण्डस्य सर्वोत्तमं स्थानं प्राप्तुमिच्छामि।

भक्तध्रुवस्य महत्त्वाऽऽकाक्षां ज्ञात्वा सर्वज्ञोऽपि अज्ञ इव, सदा प्रसन्नोऽपि प्रसन्न इव भूत्वा भगवान् नारायणोऽवदत्—हे बालभक्त, मद्भक्तस्य कृते किमपि दुर्लभं नास्ति। केवलं तवाऽस्य जन्मनस्तपसः फलेनैव नाऽहं प्रत्यक्षोऽस्मि, तव पूर्वजन्मनोऽपि भक्तिभावेन परितृप्तोऽस्मि। स्मर, स्वपूर्वजन्मनि त्वं ब्राह्मण आसीः। मन्मना मद्भक्त आसीः। किन्त्वेकेन राजकुमारेण तव मैत्री जाता। यौवने तस्य वैभवं भोगाऽऽसक्तिञ्च दृष्ट्वा तव मनोऽपि सतृष्णं जातम्। अतस्तवेदं जन्म क्षत्रियस्य स्वायम्भुवमनोर्वंशे उत्तानपादस्य द्वितीयायाः धर्मपत्न्याः सुनीतेर्गर्भादजायत। विमातुरपमानपूर्णवचनेन पितुश्च निरादरेण तव हृदि वैराग्यं स्वाभाविकमेवाऽऽसीत्। तव माता सुनीतिस्त्वां जनयित्वा धन्याऽभवत्। पश्य तपसः फलप्राप्तेरनन्तरं त्वां द्रष्टुं कामनया मम प्रेरणया सा समागता।

समागतां मातरमवलोक्य ध्रुवस्तामतिश्रद्धया तस्याश्चरणयोर्मस्तकं धृत्वा ननाम। साऽपि ध्रुवस्याऽग्रे प्रत्यक्षीभूतं चराचरस्वामिनं विष्णुं निरीक्ष्य स्वजीवनं धन्यं मन्यमाना भूमौ निपत्य स्वप्रणतिं निवेदितवती। पुनश्च स्वसुतं ध्रुवं क्रोडे निधाय चुम्बित्वा हृदये समारोपितवती।

तदानीं जनार्दनो भगवान् विष्णुरुभौ सम्बोध्य जगाद—मद्दर्शनं विफलं



न जायते। अतो हे बालभक्त ध्रुव! सर्वेषु ग्रहेषु, नक्षत्रेषु, सप्तर्षिषु, देवेषु चोच्चतमं स्थानं तुभ्यं ददामि। सप्तर्षयस्तव परिक्रमां करिष्यन्ति। ग्रहाः, नक्षत्राणि सप्तर्षयो देवाश्च आयुगम् आमन्वन्तरमेव तत्र स्थास्यन्ति, किन्तु त्वमाकल्पं तत्र स्थास्यसि। तवेयं माता सुनीतिरपि शुभ्रतारिका भूत्वा विमाने च स्थित्वा सदा त्वां द्रक्ष्यतीति कथयित्वा हरिः स्वेन सह तौ नीत्वा यथास्थानं संस्थाप्य स्वलोकं जगाम।

**ध्रुवस्य चरितं दिव्यं ये पठन्ति स्मरन्ति च।**<br>**तेषां जन्मानि साफल्यं संप्राप्स्यन्ति न संशयः।।**

अनन्तचतुर्दशी – २०५५

दिनाङ्कः – ५-८-९८

# फार्म-४

नियमः ८ द्रष्टव्यः

1. प्रकाशनस्थानम् : आरा (विहारः)
2. प्रकाशनस्य अवधिः : अर्धवार्षिकम्
3. मुद्रकस्य नाम : डॉ० गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः ? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, आरा
4. प्रकाशकस्य नाम : डॉ० गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः ? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)
5. सम्पादकस्य नाम : डॉ० गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः ? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)
6. तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति ।

ह० गोपबन्धु मिश्रः
सम्पादकः